RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-21/5379/2014-2016

॥ ओ३म् ॥

अर्थनाशं मनस्तापं गृहे
दुश्चारितानि च।
वञ्चनं चाऽपमानं च
मतिमान्न प्रकाशयेत्॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com मूल्यम्-रू. ५/- द्विवार्षिक शुल्कम्-रू. २४०/-

॥ ओ३म् ॥

धन-धान्यप्रयोगेषु
विद्यासंग्रहणेषु च।
आहारे व्यवहारे च
त्यक्तलज्जः सुखी भवेत्॥

( चाणक्य-नीति )

卐 वर्षम्-५ 卐 अंकः-२१ ( ११७ ) 卐 १ मईमासः २०१६तः १५ मईमासः २०१६ पर्यन्तम् 卐 विक्रमसंवत्-२०७३ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## सिंहस्थमहाकुम्भः प्रारम्भः, विंशतिलक्षजनैः प्रथमेऽहनि कृतममृतस्नानम्

उज्जैननगरम् । पुण्यसलिलाशिप्रायाः तीरे अप्रैलमासस्य एकोनकविंशतितमे दिनांके सिंहस्थमहाकुम्भस्य प्रथमममृतस्नानम् आरब्धम् । अनेन एव उज्जैननगरे एकविंशति-शताब्द्याः द्वितीयः कुम्भमहोत्सवः प्रारब्धः । मुनीभिः मन्त्रोच्चारणेन भक्तैश्च जयघोषैः अत्रत्य वातावरणं भक्तिभावयुतं सञ्जातम् । प्रथमे एव दिवसे अत्र विंशतिलक्षजनैः शिप्रायाम् अमृतस्नानेन पुण्यमर्जितम् । दत्तसम्प्रदायस्य तटे सर्वप्रथमं जूनापीठाधीश्वरेण महामण्डलेश्वरेण स्वामी-अवधेशानन्दमहाराजानां नेतृत्वे नागासाधुभिः स्नानं कृतम् ।



दत्तसम्प्रदायस्य तटे सर्वप्रथमं जूनापीठाधीश्वराणां महामण्डलेश्वराणां स्वामीश्रीअवधेशानन्दजीमहाराजानां नेतृत्वे नागासाधुभिः स्नानं कृतम् । नागासाधुभिः भैवभप्रदर्शनेन अमृतस्नानं कृतम् । एतदनन्तमन्यैः जनैः स्नानं कृतम् । अपरत्र च रामतटे जयश्रीरामोद्घोषैः सह वैष्णवसम्प्रदायस्य साधुभिः प्रातः अष्टवादने शुभमुहूर्तेस्नानं कृतम् । विगतदिवसादेव रामतटसहितं

शेषभागःद्वितीयपुटे

## भारतीय-प्रौद्योगिकी-संस्थानेषु संस्कृतस्य अध्यापनम्

नवदेहली । भारतसर्वकारेण भारतीयप्रौद्योगिकीसंस्थानेषु संस्कृतस्य अध्ययनार्थमादिष्टः । अस्य सूचना मानवसंसाधनविकासमन्त्री श्रीमत्स्मृतिईरानीमहोदयाद्वारा प्रदत्ता ।



तासां कथनमस्ति यत् संस्कृतसाहित्ये वर्णितं वैज्ञानिक-तकनीकीतथ्यानामध्ययनाय भारतीयप्रौद्योगिकीसंस्थानेषु संस्कृताध्ययनस्य आग्रहं कृतम् । वर्त्मनि स्मृतिईरानी पूर्वमुख्यनिर्वाचनायुक्तानां श्रीएन. गोपालस्वामिनाम् अध्यक्षतायां गठितसमित्या भारतीयप्रौद्योगिकीसंस्थाने संस्कृताध्यापनस्य अनुशंसा कृता । एतदनुसारं सर्वकारं प्रतिनिवेदिते प्रतिवेदने समितिपक्षतः कथितं यत् संस्कृतसाहित्ये वर्णितं वैज्ञानिकानां तकनीकितथ्यानां च विश्लेषणं कृतम् । अस्य कृते प्रौद्योगिकीसंस्थानेषु अन्यविषयैः सह संस्कृतस्य अध्यापनं भवेत् । येन च संस्कृते समुपलब्धानां रहस्यानामुद्घाटनं भवेदिति। केन्द्रीयमन्त्रीमहोदया लोकसभायां कथितं यत् श्रीगोपालस्वामीसमित्याः अनुशंसानां क्रियान्वयनं भवेत् यतोहि संस्कृतस्य वैज्ञानिकरहस्यानां प्रतिपादनाय प्रौद्योगिकसंस्थानेभ्यः अन्यः कश्चित् समुचितं स्थानं नैव भवितुमर्हति।

## उज्जयिन्यां सिंहस्थमहाकुम्भे आर्यसभया वैदिक धर्मस्य प्रचारः

**उज्जैननगरम्** । अप्रैलमासस्य एकविंशतितमे दिनांके सार्वदेशिकसभायाः निर्देशने तथा च मध्यभारतीय-आर्यप्रतिनिधि सभायाः संयुक्ततत्वावधाने वैदिकधर्मप्रचारसमित्या वैदिकधर्मस्य सिद्धान्तानां प्रचाराय प्रसाराय अपि च अन्धविश्वासस्य खण्डनाय शिविरस्य शुभारम्भे सार्वदेशिकसभायाः प्रधानेन श्रीसुरेशचन्दमहोदयेन दीपप्रज्वालनं कृतम् । कार्यक्रमस्यास्य अध्यक्षता श्रीधर्मपालमहोदयेन निर्वाहिता । उज्जयिन्यां शिप्रायाः




तीरे समयोजिते सिंहस्थकुम्भोत्सवस्यावसरे चतुर्वेदपारायणमहायज्ञस्य भव्यमायोजनमभवत् । यस्मिन् महायज्ञे विविधप्रान्तेभ्यः समागत्य आर्यसमाजस्य पदाधिकारिभिः आर्यजनैश्च भागं गृहीतम् ।

सार्वदेशिकसभायाः प्रधानेन श्रीसुरेशचन्दमहोदयेन कथितं यत् सिंहस्थोत्सवः विश्वस्य विशालतायोजनेषु कश्चित् महत्वपूर्णम् । अत्र कोटिसंख्यासु जनाः अमृतस्नानाय शिप्रायाः तीरे एकत्रिताः भवन्ति । उपमन्त्रिभिः श्रीविनयार्यमहोदयेन कथितं यत् वैदिकधर्मस्य प्रचारसमितिः तथा च आर्यप्रतिनिधि सभा अस्मिन् अवसरे ईश्वरीयं ज्ञानं, सत्यसनातनवैदिकधर्मस्य च सन्देशं लोकेषु प्रचारयति । श्रीधर्मपालमहोदयेन कथितं यत् अस्यायोजनस्य सफलतायै सर्वे आर्यसमाजीयजनाः धन्यवादार्हाः । तैः कथितं यत् महर्षिदयानन्दमहाभागानां सिद्धान्तानां प्रसाराय प्रचाराय च एतादृशेषु महोत्सवेषु आर्यसमाजस्य सक्रीयभूमिकायाः आवश्यकता वर्तते । एतदनन्तरं विविधैः आर्यपदाधिकारिभिः स्वकीयविचाराः प्रस्तुतः ।

शेषभागःद्वितीयपुटे

## संस्कृतकाव्यानामवबोधने टीकानां योगदानम्

राष्ट्रियसंस्कृतसंस्थानस्य वेदव्यासपरिसरः, बलाहरः, हिमाचलप्रदेशः इत्यस्य तत्त्वावधाने संस्कृतकाव्यानामवबोधने टीकानां योगदानम् (Contribution of Commentaries in understanding San-



skrit Kavyas) इति शीर्षकमादाय एकदिवसीयसाहित्यशास्त्रीयराष्ट्रियसंगोष्ठी -14 मार्च 2016 दिनांके उत्तर-ओडिशा-विश्वविद्यालयस्य स्वनामधन्यकुलपतेः विशिष्टसंस्कृतविदुषः

शेषभागःचतुर्थपुटे

## योगगुरुणा स्वामीरामदेवेन संस्थापितस्य पतंजलेः व्यवसायिकं लक्ष्यं दशसहस्रकोटिः

न्वदेहली । योगगुरुणा स्वामीरामदेवेन स्थापितस्य 'पतञ्जलि-आयुर्वेद-लिमिडेट' इत्यनेन व्यापारिकसमूहेन 2015-16तमे वर्षे भव्यप्रदर्शनं कुर्वन् पञ्चसहस्रकोटि-रूप्यकाणामर्थागमः साधितः । पतंजलिना सम्प्रति दशसहस्रकोटिरुप्यकाणां लक्ष्यं स्थापितम् । सममेव साम्प्रतिके वित्तवर्षे 1150कोटिरूप्यकाणां निवेशस्य घोषणा कृता । पतंजलिसमूहः दुर्भिक्षपीडितेषु बुन्देलखण्ड-मराठावाडा-विदर्भसहितं देशस्य षट्स्थानेषु प्रसंस्करणोद्योगाः स्थापयिष्यति ।

पतञ्जलेः एतत् लक्ष्यं घोषयन् स्वामीश्रीरामदेवेन संवाददाताभिः कथितं यत् बुन्देलखण्डस्य दुर्भिक्षपीडितेषु क्षेत्रेषु



प्रसंस्करणोद्योगस्य स्थापनेन तत्रत्य कृष्काणां सहायता भविष्यति । अस्य लक्ष्यस्य पूर्त्यर्थं पतंजलिसमूहेन दुग्धोत्पादाः, पश्वाहारः, खादी-उत्पादानां निर्माणं क्रियते । सममेव देशीगौविषयक-अनुसन्धानाय 100कोटिरूप्यकाणां व्ययः क्रियते । आहत्य गौसंरक्षणाय 500कोटिरूप्यकाणां व्ययो भविष्यति । अपि च छात्राणां कृते वैदिकशिक्षायै विश्वस्तरीयविश्वविद्यालयस्य उद्घाटनं करिष्यति ।

अस्मिन् अवसरे पतञ्जलेः प्रबन्धनिदेशकेन आचार्येण श्रीबालकृष्णेन कथितं यत् पतञ्जलिः विश्वस्य प्रथम-जैविक-विश्वकोशस्य निर्माणं करिष्यति तथा च आयुर्वेदे चिकित्सा प्राप्तानां जनानां आदत्तप्रविधायाः निर्माणं करिष्यति । तैः कथितं यत् पतंजलिद्वारा बुन्देलखण्डादिदुर्भिक्षपीडितेषु क्षेत्रेषु कृष्काणां आमालक-घृतकुमारी-तुलसी-इत्यादरीनामौषधीनामुत्पादनाय प्रोत्साहितं करिष्यति ।

**प्रथमपुटस्य शेषभागः**

## सिंहस्थमहाकुम्भः प्रारम्भः.....

प्रत्येकस्मिन् तटे जनाः प्रतीक्षायामासन् । साधूनां स्नानं अपराह्न द्विवादनपर्यन्तं प्रचलत् । सामान्यतः अस्मिन् समये साधवः एव स्नानं कर्तुं शक्यन्ते तथापि जनसामान्येनापि अस्मिन्नेव काले स्नानं कृतम् । श्रीशंकराचार्येण नरेन्द्रानन्दसरस्वतीमहाराजेनापि अत्र अमृतस्नानं कृतम् । स्नानानन्तरं तैः कथितं यत् महाकुम्भे स्नानस्य फलं सहस्र-अश्वमेधयज्ञानां समतुल्यः वर्तते ।

## ‘ सिंहस्थ-कुम्भमेलायाः कृते साक्षात्-सम्वादः’

साम्प्रतं महाकाल-नगर्याम् उज्जयिन्यां सिहंस्थ-पूर्ण-कुम्भ-मेला प्रवर्तते । जगति भारतीय-धार्मिक-आध्यात्मिक-परम्परासु च



प्रसारणाधिकारी श्री डी.थोमस् एतादृशान् अपरान् कार्यक्रमान् प्रसारयितुं समुत्सहते इत्यस्ति सुखकरी वार्ता।’

ऐतिहासिक-पर्वेदं सर्वेषामपि कृते शुभदं सुखदं च स्यादिति भावनया प्रवर्तमानायाः अस्याः मेलायाः सुबहु महत्वं वर्तते इति जानन्ति विद्वान्सः वार्ताहराः साधकाः निष्ठावन्तोह्यत्रभवन्तो भवन्तश्च। परश्वः अर्थात् 2073-विक्रम-संवत्सरस्य चैत्र-वैशाख-मासयोः पूर्णिमायां [22-04-2016] प्रथमं शाहिस्नान-पर्व भविता। एनमवसरम् अभिलक्ष्य आकाशवाण्याः विदेश-प्रसारण-विभागेन {Indian Overseas Services of All India Radio, New Delhi} विशिष्टं साक्षात्संभाषणम् प्रसार्यते। भारतीय-संस्कृत-पत्रकार-सङ्घस्य महासचिवेन साक्षात्संभाषमाणः श्रीला.ब.शा.रा.सं.विद्यापीठस्य कुलपतिः भा.सं.प.संघस्य उपाध्यक्षः च प्रो.रमेशकुमार-पाण्डेयः सिंहस्थ-कुम्भस्य विस्तृतम् ऐतिहासिकं ज्यौतिषं सांस्कृतिकम् आध्यात्मिकञ्च महत्वं ख्यापितवान्।

# देहल्यां प्रारब्धः भाषापत्रकारितापाठ्यक्रमः

-डॉ.ऋषिराजपाठकः

नवदेहली।‘संस्कृत-पत्रकारितायाः सार्धैक-शत-वर्षाणि ऐषमः जून-मासे प्रथम-दिनाङ्के पूर्णतां यास्यन्ति’- इति तथ्यमाधृत्य देशे नैकत्र अनेक-विधानि अभिनवानि संस्कृत-कार्याणि प्रवर्त्यन्ते इति वृत्तं नूनं हर्ष-प्रदं




समेषामपि संस्कृतानुरागिणां प्राच्य-विद्या-समाराधकानां च कृते। एतेषु अभिनवकार्येषु अन्यतमं वर्तते- नवदिल्ल्यां श्रीला.ब.शा.रा.सं.विद्यापीठे ‘भाषा-पत्रकारितायाः वर्षावधिक-पाठ्यक्रमस्य शुभारम्भः।’ अवसरेह्यस्मिन् विद्यापीठस्य कुलपतेः भा.सं.प.संघस्य उपाध्यक्षस्य च प्रो.रमेशकुमार-पाण्डेयस्य आध्यक्ष्ये, भा.सं.प.संघस्य च महासचिवस्य डॉ.बलदेवानन्द-सागरस्य मुख्यातिथित्वे उद्घाटन-समारोहः महता समारम्भेण सम्पन्नः। अस्य भाषा-पत्रकारिता-पाठ्यक्रमस्य संयोजिका प्राचार्या कमला-भारद्वाज-महाभागा असूचयत् यत् यू.जी.सी. इति विश्व-विद्यालयानुदान-आयोगेन मानितेह्यस्मिन् पत्रकारिता-कार्यक्रमे संस्कृत-हिन्दी-आङ्गल-भाषा-माध्यमेन पञ्जीकृताः छात्राः पत्रकारिता-विशेषज्ञैः प्रशिक्षयिष्यन्ते, कक्षाश्च प्रायेण शनि-रविवासरयोः प्रचालयिष्यन्ते। मुख्यातिथि-पदाद् भाषमाणः डॉ.सागरः समुपस्थितान् विदुषः पत्रकारिता-छात्रान् च सानुरोधं साग्रहञ्च न्यवेदयत् यत् साम्प्रतं परिवर्तिते परिदृश्ये संस्कृत-समाजेन स्वीयं सामाजिकं सांस्कृतिकं राजनीतिकञ्च दायित्वं प्रपूरयितुं सक्रियेण भाव्यम् , तच्च पत्रकारिता-माध्यमेन सारल्येन साधयितुं शक्यते। अध्यक्ष-पदाद् भाषमाणःकुलपति-वर्यः प्राचार्यः श्रीपाण्डेयः अब्रवीत् यद् ऐतिहासिकोह्ययम् अवसरः यत् विद्यापीठेन आधुनिकतमोह्ययं विषयः स्वीय-पाठ्यक्रमेषु समावेश्यते। एतदर्थञ्च विद्यापीठमिदं छात्रेभ्यः सर्वविधं संसाधन-सौविध्यम् उपायनीकरिष्यति। वरिष्ठो विद्वत्-तल्लजः प्राचार्यः नागेन्द्र-झाः स्वीय-सम्बोधने छात्रान् समधिकावधानतया आधुनिक-विषयेह्यस्मिन् परिश्रमं विधातुं सम्प्रेरितवान्। अवसरेह्यस्मिन् समुपस्थितेषु विद्यापीठस्य नाना-विभागाध्यक्षेषु संस्कृत-विद्वत्सु च प्राचार्यः हरेराम-त्रिपाठी, प्राचार्यः महेश-प्रसाद-सिलोडी, प्राचार्यः शुद्धानन्द-पाठकः, प्राचार्यः जयकान्त-सिन्ह-शर्मा, प्राचार्यः रामराज-उपाध्यायः,प्राचार्यः रामानुज-उपाध्यायः, प्राचार्यः के.अनन्तः, प्राचार्यः के.एस.सतीशः,प्राचार्यः सुन्दर-नारायण-झाः, प्राचार्यः भागीरथ-नन्दः, प्राचार्यः हरिहर-त्रिवेदी, प्राचार्या सुजाता-महाभागा प्राचार्या सविता-महाभागा चान्यतमाः आसन्।

# ‘अभिनव-गुप्तस्य पुनर्पाठस्य परिसंवादः सम्पन्नः’

**प्रो. कमलेशकुमार छ. चोकसी**

अमदावादस्थेन सुप्रसिद्धेन भवन्स शेठ आर.ए. विनयन-वाणिज्य महाविद्यालयेन ऐप्रिलमासस्य पञ्चमे दिनांके मङ्गलवासरे समायोजिते राज्यस्तरीये परिसंवादे उद्धाटनसमारंभे उपस्थिताः माहानुभावाः ङ्क तत्रभवन्तः श्री प्रो. कमलेशकुमारः चोकसी, प्रो. राजनारायणः शुक्लः , श्री भाग्येशः झा, प्रो. एम.एन. पटेल, (कुलपतयः, गुजरात विश्वविद्यालयस्य), श्री मुकेश एस. पटेलः, श्री आशुतोषः भटनागरः, प्रो. निरजा अरुणः (प्रधानाचार्या, भवन्स कोलेजस्य)

अमदावादस्थः सुप्रसिद्धः भवन्स शेठ आर.ए. विनयन-वाणिज्य महाविद्यालयः विगते ऐप्रिलमासस्य पञ्चमे दिनांके मङ्गलवासरे अभिवनगुप्त ङ्क पुनर्पाठः इति विषयमाधृत्य राज्यस्तरीयः परिसंवाद एकः समायोजत । अस्य परिसंवादस्य उद्धाटनसमारंभे तत्रभवन्तः श्री प्रो. एम.एन. पटेल, (कुलपतयः, गुजरात विश्वविद्यालयस्य), विशेषतः उपस्थिताः आसन् । एतैः समुद्घोषितम् यत् अहम् स्थपतिः, अत संस्कृतविदुषाम् नामानि कृतीः च तादृशं न जानामि, परन्तु मदीया एषा भावना वर्तते यत् संस्कृतभाषायां निबद्धं प्राचीनानाम् आचार्याणाम् ज्ञानं सर्वेषाम् कृते उपलब्धम् स्यात् । मया अभिनवगुप्तपादानाम् नाम अपि पूर्वं न कदाचित् श्रुतम् । परन्तु अस्य परिसंवादस्य उद्धाटनसमारंभे आगमनाय यदा निमन्त्रणम् प्राप्तम् तदा इतः ततः एतेषां महानुभावानाम् विषये सामान्यतः ज्ञातम् यदेते विद्वांसः काव्यशास्त्रे तन्त्रशास्त्रे च कृतभूरिश्रमाः महत्त्वपूर्णम् प्रदानम् कृतवन्तः । तेषां जीवनकालस्य इयं सहस्राब्दी । अस्मिन् अवसरे अधिकाधिकाः जनाः एतान् पूर्वजान् आचार्यपादान् जानन्तु तेभ्यो सश्रद्धम् प्रणामाञ्जलिः ददन्तु तादृशः उपक्रमः सर्वत्र करणीयः इति ।

प्रो. कमलेश चोकसी वर्यैः भणितम् यत् एते आचार्याः स्वकीयस्य दर्शनस्य तद्दर्शनानुरूपस्य आचारस्य च प्रवर्तकाः आसन् । अनेन सहैव एते काव्यशास्त्रादिषु पारंगताः सन्तः तत्रापि विविधानाम् मतानाम् समीक्षापूर्वकं स्वीयं मतमपि प्रावर्तन्त । अभिनवभारती ध्वन्यालोकलोचनटीका चेति तेषां सुप्रसिद्धे । वस्तुतः विना अभिनवभारतीं नाट्यशास्त्रम् विना च लोचनम् ध्वन्यालोकः पठितुम् पाठयितुम् वा न शक्यते ।

अस्मिन् अवसरे विशेषव्याख्यानाय उत्तरप्रदेशस्य गाजियाबादतः प्रो. प्रो. राजनारायणः शुक्लः उपस्थिताः आसन् । एतैः अभिवनगुप्तप्रोक्तम् शैवदर्शनम् सरलया रीत्या प्रदर्शितम् । तत्रस्थं ज्ञान-विज्ञानसूत्रमपि प्रदर्शितम् । श्री आशुतोषः भटनागरः दिल्लीतः समागताः । एते महोदयाः अभिनवगुप्तादीन् पूर्वतनान् अस्माकं गौरवरूपान् आचार्यान् विस्मृतिपटतः उत्तीर्य सर्वेषाम् भारतीयानाम् स्मृतिपटे स्थातुं प्रयत्नरताः सन्ति । प्रो. निरजा अरुणः (प्रधानाचार्या, भवन्स कोलेजस्य) महोदया सर्वमपि कार्यक्रमं सुचारुतया सम्पादितवती अभिनवगुप्तस्य रससूत्रं च विस्तरतो श्रावितवती । अस्मिन् परिसंवादे प्रायः सार्धशतं प्रतिभागिनः शताधिकाः च छात्राः स्वकीयया उपस्थित्या शोभां वर्धितवन्तः कार्यक्रमस्य च सफलतां रचितवन्तः ।।

### पाठकानां कृते सूचनाः-

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन ‘संस्कृत-संवाद’ इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna**
**Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

### लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रियन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# डॉ. रमाकान्तशुक्लाभिनन्दनग्रन्थः ( श्रीहीरकप्राभृतम् )

**समीक्षकः - म.म. देवर्षिकलानाथशास्त्री**

**प्रधानसम्पादकः**, 'भारती'मासिकपत्रिकायाः। **अध्यक्षः**, आधुनिकसंस्कृतपीठे, ज.गु.रा.राजस्थानसंस्कृतविश्वविद्यालयस्य। **अध्यक्षचरः**, राजस्थानसंस्कृताकादम्याः, **निदेशकचरश्च** संस्कृतशिक्षाभाषाविभागयोः (राजस्थानशासने)
सी/८ पृथ्वीराज रोड सी. स्कीम, जयपुर राजस्थान ३०२००१

राष्ट्रपतिसम्मानितेन पद्मश्रीत्यलङ्करणसभाजितेन, विविधपदवीविभूषितेन, भारतीयसंस्कृतपत्रकारसंघाध्यक्षेण, 'अर्वाचीनसंस्कृतम्' इति पत्रिकासम्पादकेन, 'भाति मे भारतम्' इत्यादिगीतिप्रस्तुतिभिरर्जितयशसा डॉ. रमाकान्तशुक्लेन साहित्य-संस्कृतसेवासक्रियस्य स्वकीयस्यायुषः पादोनशताब्दी (७५ वर्षाणि) सानन्दं सम्पूरितेति शुभावसरमभिनन्दयितुं दिल्लीमहानगरे देववाणीपरिषदा महोत्सवः समायोजितः, अभिनन्दनग्रन्थरूपेण 'श्रीहीरकप्राभृतम्' इति शीर्षकं बिभ्राणस्य विशालग्रन्थपूगस्य चत्वारः खण्डा अपि प्रकाशिता इति समाधियतैव स्यात् सूचना संस्कृतिसेविभिः पत्र-पत्रिका-माध्यमेन।

१९४०ई. वर्षे लब्धजन्मनः शुक्लवर्यस्य सेयं हीरकजयन्ती अभिहिता समायोजकैरिति कृत्वा हीरक-प्राभृतमिति नामकरणं विहितं स्याद् ग्रन्थमालायाः अस्याः।

प्रसङ्गेनानेन स्मारितास्मभ्यं पञ्चवर्षपुरातन्येका घटना। देशेऽस्माकं स्वर्णजयन्ती-हीरकजयन्तीत्याद्युत्सवानां परम्परा कदा प्रारभत। पाश्चात्त्येयं परम्परा यत् २५ वर्षपूर्तेरभिनन्दनं सिल्वरजुबिलीतिसंज्ञामनुसृत्य रजतजयन्तीरूपेण क्रियते, ५० वर्षपूर्तिः गोल्डनजुबिली संज्ञानुसारं सुवर्णजयन्तीत्यभिधीयते, ७० वर्षपूर्तिः डायमन्डजुबिलीतिसंज्ञानुसारं हीरकजयन्तीत्यभि-धीयते, ७५ वर्षपूर्तिः प्लैटिनमजुबिलीत्यभिधीयते अतस्तस्याः कृते का संज्ञा स्यात्! बहुभिः 'अमृतमहोत्सवः' इत्यभिहिता सेयं जयन्ती। किन्त्वमृतमहोत्सवस्तु ४० वर्षपूर्तौ तदनन्तरं वा समायोज्यते। शताब्दीतः पूर्वमिति बहवः ऊचुः। अतः प्लैटिनमस्य पर्यायोऽस्माकं संस्कृतौ कौस्तुभमणिरुच्यते। श्रीकृष्णस्यायं शोभाकरो मणिः, तस्य च आकृतिवर्णनं च तादृशमेव यादृशं प्लैटिनमस्य भवतीति ७५ वर्षाभिनन्दनोत्सवः कौस्तुभजयन्तीत्युदीरितो विद्वद्भिः। वाराणस्या अनेकेषां विदुषां ७५ वर्षीयमभिनन्दनं कौस्तुभजयन्तीत्यभिधायाकारि, जयपुरेऽपि तथैवाभूत्। प्राचीनकाले तु षष्टिवर्षपूर्त्यवसर एवार्धस्यायुषः फलकं १२० वर्षाणां मन्यते, पाश्चात्त्यदेशेषु १०वर्षपूर्तिः एल्युमिनियमजुबिलि, २५वर्षपूर्तिः सिल्वरजुबिलीत्यादि सुविदितमेव। तत्सर्वमनुसृत्यात्रापि जयन्तीसमारोहः आरब्धः, अन्यथा ४० वर्षपूर्तौ 'सहस्रचन्द्रदर्शनमहोत्सवः समायोज्यते भारतस्य विभिन्नेष्वञ्चलेषु। अतः ७५ वर्षपूर्तिसमारोहः कौस्तुभजयन्तीरूपेण सममान्यत बहु। अस्तु, प्रसङ्गवशात् स्मारितैरस्माभिः अत्राप्रासङ्गिकमिदं विवरणं पाठकानां प्रमोदाय प्रास्तावि।

डॉ. रमाकान्तशुक्लवर्याय यत् हीरकप्राभृतं ग्रन्थ-चतुष्टयरूपेण समर्पितं तस्य सुनियोजितं सम्पादनं, सर्वाङ्गीणां, विशिष्टां, संग्रहणीयां सामग्रीं, शुद्धं, सुचारु मुद्रणं, विशालं वाङ्मयफलकं, समग्रस्यापि देशस्य, देशान्तराणां च सर्वेषां विदुषामत्र प्रशस्यं प्रातिनिध्यं च वीक्ष्य सुतरां हर्षगद-गदमभूदस्माकं चेतः। प्रथमे खण्डे विद्वन्मूर्धन्यानां शुभाशिषः, अभिनन्दनवाचश्च गद्य-पद्य-गीतिमयशैलीबद्धा मुद्रिताः सन्ति, ततः शुक्लवर्याणां सम्पूर्णो जीवनपरिचयः, कृतित्वविवरणम् शुक्लवर्याणां साक्षात्काराः संस्कृते हिन्दीभाषायां च प्रस्तुताः। तदनु तेषां प्रमुखकृतीनां समीक्षाप्यत्र मुद्रितास्ति। अत्र विविधविदुषां यानि संस्मरणानि मुद्रितानि, तानि सर्वात्मना हृदयावर्जकानि।

द्वितीयः खण्डः 'कविवर रमाकान्त शुक्ल का संस्कृत साहित्य को योगदान' शीर्षकं शोधग्रन्थं वहति यस्मिन् शोधकर्त्रा डॉ. दुर्गाप्रसादसिंहेन शुक्लवर्याणां वंशपरिचयः, जीवनपरिचयः, कृतिपरिचयः, कर्तृत्वविवरणं, देशे विदेशेषु च प्रस्तुतिविवरणं, कृतीनां समीक्षणं, विविध विदुषां मतानि संस्मरणानि च सम्यगभिलिखितानि। ग्रन्थोऽयं हिन्दीभाषायां निबद्धोऽस्ति।

तृतीये खण्डे शुक्लवर्याणां 'सर्वशुक्लोत्तरा' शीर्षकस्य रचनासंग्रहस्य शोधपरकं समीक्षणं कुर्वाणः डॉ. चन्द्रप्रकाश-उप्रेति इत्यस्य शोधविदुषः शोधप्रबन्धः प्रकाशितोऽस्ति। अत्रापि व्यक्तिपरिचयकृतिपरिचय-सर्वविद्या-सामग्री द्रष्टुं शक्यते।

हीरकप्राभृतस्य चतुर्थः खण्डो वैविध्यमयं विषयवस्तु प्रस्तौति। पञ्चसु भागेषु विभाजितेऽस्मिन् ग्रन्थे नूतना काचन सङ्कलनदृष्टिः प्रस्तुताऽस्ति सम्पादकवर्यैः। सम्पादकीयाद्यनन्तरं शुक्लवर्याणामभिनन्दनसमारोहस्य, प्राभृतसमर्पणसमारोहस्य च विवरणं (भाषणानां संक्षिप्तप्रस्तुतिसहितं) प्रस्तुतमस्ति।



तदनु विशाले भागे शुक्लवर्याणां विभिन्नानां रचनानां (संस्कृतबद्धानां) हिन्दीभाषायां, भोजपुरीभाषायाम्, आङ्ग्ल-भाषायां वा विविधैरनुवादकैः विहिता अनुवादाः प्रस्तुताः सन्ति। 'पण्डितराजीयम्' शीर्षकस्य ध्वनिरूपकस्यात्र मूलमपि मुद्रितम्, हिन्द्यनुवादोऽपि, आङ्गलभाषानुवादोऽपि।

ततश्च शुक्लवर्याणां समकालिकानाम् (अर्थात् वर्तमानकालिकानां) संस्कृतरचनाकाराणां परिचायकाः निबन्धाः संस्कृते, हिन्द्याम्, आंग्लभाषायां च मुद्रिताः सन्ति येषु कवीनां, नाटककाराणां, गद्यकाराणां चापि परिचयः समीक्षणादिकं च विद्वद्भिर्विलिखितं मुद्रितमस्ति। अपरस्मिन् भागे संस्कृते, हिन्द्यामाङ्ग्लयोः च विलिखिताः १४ लेखाः (शोधनिबन्धाः कतिपयगद्य-काव्यादिरचना अपि) प्रस्तुताः सन्ति। एतेषां विषयफलकं व्यापकमस्ति।

अन्तिमो यः सुविशालः सप्तमभागाख्यः खण्डोऽस्ति तत्र समस्तेऽपि हीरकप्राभृताख्ये खण्डचतुष्टये यैः कैश्चिदपि विद्वद्भिः संस्मरणानि, सन्देशाः, शुभाशंसाः, लेखा वा प्रहिता मुद्रिताश्च सन्ति तेषां संस्कृतविदुषां वर्णक्रमेण सुसम्पादितः परिचयो मुद्रितोऽस्ति। नूतनोऽयं प्रक्रमः पाठकानां सविशेषं ध्यानमर्हति, यतो हि लेखकानां सुनियोजित एतादृशः परिचयो न प्रकाश्यतेऽभिनन्दनग्रन्थादिषु।

तदनु कविवर्यस्य रमाकान्तशुक्लस्य समग्रामपि जीवनयात्रां चित्रयन्ती चित्रदीर्घा मुद्रिताऽस्ति यस्यां बाल्यकालादारभ्य विवाहादिघटनानां सारस्वतायोजनानां, सम्मानसमारोहाणां, पात्राणां च चित्राणि द्रष्टुं शक्यन्ते। तदनु सम्मानपात्राणामुपाधिपत्रादीनां चापि चित्राणि मुद्रितानि। इत्थं खण्डचतुष्टये विभाजितोऽयमभिनन्दनग्रन्थः सम्पादककौशलमप्यभिव्यनक्ति, संयोजनकौशलं व्यवस्थापककौशलं मुद्रणकौशलञ्चापि। स्मरेयुरेव पाठका यत् डॉ. रमाकान्तशुक्लस्य पञ्चाशद्वर्षपूर्तौ (स्वर्णजयन्त्याख्येऽवसरे) "देववाणीसुवासः" इति शीर्षकं बिभ्राणो भागद्वये विभाजितोऽभिनन्दग्रन्थः प्राकाशि। २५ वर्षपूर्वं यत्राऽऽधुनिकसंस्कृतसाहित्यपरिचायिका प्रभूता सामग्री प्राकाशि। तामेव स्मारयन्, तां चाप्यतिशयानोऽयं खण्डचतुष्टयात्मको ग्रन्थः सुतरां प्रेरकः, संग्रहणीयः स्वादनार्हश्चेति सूचयन्तो भृशं प्रमोदायामहे, वर्धापयामः डॉ. रमाकान्तशुक्लवर्यं, साधुवादैर्धन्यवादैश्च सभाजयामः सम्पादकवर्यान्, प्रकाशकान्, सहयोगिनश्च सर्वान्।

ग्रन्थनाम - श्रीहीरकप्राभृतम् ( आचार्यश्रीरमाकान्तशुक्लहीरकजयन्तीशुभाभिनन्दनग्रन्थः)। प्रधानसम्पादकः - आचार्यः इच्छारामद्विवेदी( प्रणवः)। सम्पादकः - डॉ. ऋषिराजपाठकः। प्रबन्धसम्पादकः - डॉ. चन्द्रमौलिशुक्लः। प्रकाशकः - देववाणीपरिषद्, आर ६ वाणीविहार, नई दिल्ली ११००५९। मूल्यम् - प्रथमः खण्डः, पृष्ठसंख्या ५४०, मूल्यम्- १०००/-। द्वितीयखण्डः, पृष्ठसंख्या- ५५० मूल्यम् - १०००/-। तृतीयखण्डः पृष्ठसंख्या २५० मूल्यम् - ६००/-। चतुर्थभागः पृष्ठ संख्या ७५० मूल्यम् २०००/-

# दिल्ल्यां मनुस्मृतिविषया सङ्गोष्ठी

(सं. मुनिराजपाठकः)१०.४.२०१६ तमे दिनाङ्के देहल्यां राजीवनगरस्थे श्रीनारायणधाम्नि ऋषिमुनिकविवाण्याः तत्त्वावधाने 'वर्तमानसमये मनुस्मृतेः उपादेयता' इति विषयमवलम्ब्य काचिद् गोष्ठी समायोज्यत। ऋषिराजपाठक-कृतेन ऋग्वेदीयमङ्गलाचरणेन वरदशुक्ल-पुष्पितझा-वटुभ्यां कृतेन लौकिकमङ्गलाचरणेन चेयं गोष्ठी समारभत। सत्रद्वयात्मिकया अस्या गोष्ठ्याः आध्यक्ष्यं देववाणीपरिषद्-महासचिवैः आचार्यैः डॉ. रमाकान्तशुक्लवर्यैः, मुख्यातिथित्वञ्च मन्दाकिनीसंस्कृतविद्वत्परिषन्महासचिवैः आचार्यैः डॉ. परमानन्दझावर्यैः निर्व्यूढम्। व्याख्यानसत्रे आनुषङ्गिकवक्तव्य-रूपेण श्रीब्रिजेशकुमारमिश्रेण विषयप्रवर्तनं कृतं, तदनु डॉ. ऋषिराजपाठकेन मनोरितिहासः पारम्परिकैतिहासिकदृशा समुद्घाटितः, एतदनु श्रीजीवनशर्मणा मनुस्मृतेः परम्परा, महात्मना वीणापाणित्रिपाठिना च मनुस्मृतेः प्रक्षिप्तपाठस्य समीक्षणपुरस्सरं विषयविभाजनं प्रस्तुतम्। सत्रेऽस्मिन् व्याख्यानसूत्रस्य मुख्यवक्त्रा श्रीराजेशकुमारमिश्रेण मनुस्मृतेः उपयोगिता प्रतिपादिता। ततश्च भोजनानन्तरं परिचर्चासत्रे नैकैः जिज्ञासुभिः मनुस्मृतिमधिकृत्य विविधाः प्रश्नाः पृष्टाः, समाधातृमण्डलेन च ते उत्तरिताः। पुनः मुख्यातिथिभिः डॉ परमानन्दझामहोदयैः स्वीयोद्गारप्रकटनपुरस्सरं भारतीयवत्सरेऽस्मिन्नपि स्वरचितं काव्यं प्रस्तुतम्। अन्ते च अध्यक्षैः डॉ. रमाकान्तशुक्लवर्यैः संस्कृतकाव्येषु मनुस्मृतेः व्याख्यानं कुर्वद्भिः तस्य उपयोगिता प्रदर्शिता नूतनं वत्सरमवलम्ब्य च 'नूतने वत्सरे ते भवेन्मङ्गलम्' 'भाति मे भारतम्' चेत्येतद्काव्यद्वयस्य कानिचन रमणीयपद्यानि च श्राविताानि।



धन्यवादज्ञापनं श्रीमतीविनीतात्यागी कृतवती। इत्थं श्रीमुनिराजपाठकेन तत्सहयोगिना च श्रीविपिनकुमाराग्रवालेन सञ्चालितोऽयं कार्यक्रमः सम्पन्नतामगात्।

# सम्पादकीयम्

## सुखस्य मूलं धर्मः

भूमण्डलेऽस्मिन् सर्वेऽपि मानवाः सुखस्य कामना कुर्वन्ति । सुखपूर्वकं जीवनयापनमेव समेषां लक्ष्यो भवति । सुखस्य प्राप्तिः कथं भवेदिति शंकायां सति वैदिकवाङ्मये प्राप्यते यत् सुखस्य मूलं धर्मः । महदाश्चर्यश्च विषयोऽयं यद् अद्यत्वे अशान्तेः मूलकारणं रूपेण विविधाः धर्माः एव दृष्टिपथे आयन्ति । सर्वेषु धर्मेषु परस्परं संघर्षस्य भावना दृश्यते । धर्मस्य नाम्ना जनाः विभाजिताः दृश्यन्ते । सर्वेषां मते तेषामेव धर्मः श्रेष्ठतमः । एवमत्र 'सुखस्य मूलं धर्मः' इत्यस्य वाक्यस्य संगतिः कथं स्यात् ।

वस्तुतस्तु अद्यत्वे समाजे ये धर्मस्य नाम्ना प्रचलिताः हिन्दू-मुस्लिम-क्रिश्चियनादयः ते मात्रैक जीवनविधा एव । जीवनविधा च पारस्थितिकी भवति । यत्र यादृश्यः परिस्थितयः भवन्ति तत्रत्य तद्वदेव जीवनविधा भवति । एतत् वास्तविकं धर्म नास्ति । तदा धर्म इति किम् इति प्रश्नस्योत्तरं लभ्यते वैदिकवाङ्मये - वेदाऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च । इत्येवं चतुर्धा विविच्य धर्मस्य एकमेव लक्षणं प्रतिपादितमत्र यत् सदाचारैव वास्तविकं धर्मस्य लक्षणम् । सदाचारेणैव मानवः सुखस्य अनुभूतिं प्राप्तुमर्हति । सदाचारणेन एव अपरे जनाः तुष्यन्ति । अतः सदारचणमेव वास्तविको धर्मः । अथ सदाचार इति किम् । कीदृशः आरचरणः सद्-आचरणं कथ्यते इति प्रश्ने सति - धृतिक्षमादमोऽस्तेयं शौचमिन्द्रीयनिग्रहः । धीर्विद्यासत्यमक्रोधो दशकं धर्म लक्षणम् । यदा आचरणे क्षमा-अस्तेय-शौचं-अक्रोध-इत्यादयः गुणाः आगच्छन्ति तदेव आचरणं सदाचरणमिति कथ्यते । अपरेषां अस्माकं कृते यादृशमाचरणम् अस्मान् रोचते, अस्माकमपि तादृशमेव आचरणम् अपरेषां कृते सदाचरणमिति भवति । एष एव सनातनो वैदिकधर्मः ।

एवमेतत् प्रकारेण यदा वयं धर्मस्य अर्थं परिज्ञाय सदाचरणेन व्यवहरामः तदैव धर्मेण सुखस्य प्राप्तिः भवतिमर्हति । अन्यथा हिन्दू-मुस्लिम-क्रिश्चीयनादिधर्मेभ्य सामाजिको विभागो एव जायते तच्च कदापि न सुखाय ।

प्रथमपुटस्य शेषभागः

### संस्कृतकाव्यानामववोधने टीकानां.....

प्रो.प्रफुल्लकुमारमिश्रमहोदयस्य मुख्यातिथित्वेन, संस्थानस्य इलाहावादस्थगङ्गानाथपरिसरस्य व्याकरणविभागाध्यक्षस्य प्रो. वनमाली विश्वालः इति नामधेयस्य विदुषः विशिष्टातिथित्वेन, राष्ट्रियसंस्कृतसंस्थानस्य वेदव्यासपरिसरस्य प्राचार्यस्य प्रो.लक्ष्मीनिवासपाण्डेयमहोदयस्य आध्यक्ष्येण सुसम्पन्ना। सम्मेलनस्यादौ सुश्री-चन्द्रिकाद्वारा प्रस्तुतया सरस्वतीवन्दनया तथा श्रीगौरवात्रिद्वारा गीतेन संस्थानकुलगीतेन कार्यक्रमस्य शुभारम्भो जातः।

तदनु औद्घाटनिकसत्रे प्रो.प्रफुल्लकुमारमिश्रमहोदयेन मेघदूतस्याववोधने संस्कृतटीकानां योगदानम् इति शीर्षकमधिकृत्य विस्तृतं शोधपत्रं प्रस्तुतम्।

ततः हिमाचलकेन्द्रीयविश्वविद्यालयतः आगतः श्रीजयकृष्णमहोदयः, राष्ट्रियसंस्कृतसंस्थानस्य वेदव्यासपरिसरस्य डा. मधुकेश्वरभट्टः, डा. अनूपकुमारपाण्डेयः, डा.परमेशकुमारशर्मा च विभिन्नसंस्कृतकाव्यानामवबोधने तत्तट्टीकानां योगदानविषये सारगर्भितानि शोधपत्राणि प्रस्तुतवन्तः। ततः प्रो. वनमाली विश्वालः महोदयः सौन्दर्यलहर्यावबोधने टीकानामवबोधनम् इति विषये विशिष्टं व्याख्यानमकरोत्। अन्ते औद्घाटनिकसत्रस्य अध्यक्षः प्रो.लक्ष्मीनिवासपाण्डेयमहोदयः संस्कृतटीकानां बह्वायामि स्वरूपं प्राकटयत्।

माध्यन्दिनं सत्रम् डा.गणेशशंकरविद्यार्थिमहोदयस्याध्यक्षत्वेन तथा डा. अनुपपाण्डेयमहोदयस्य सञ्चालकत्वेन सुसम्पन्नं यत्र हिमाचलकेन्द्रीयविश्वविद्यालयतः आगतः डा. मुकेशकुमारः, राष्ट्रियसंस्कृतसंस्थानस्य वेदव्यासपरिसरस्य डा.सुज्ञानकुमारमाहान्तिः, श्रीविपिनकुमारझा , श्रीविवेकशर्मा, श्री हेमराजः, श्री अमनदीपशर्मा, डा. सुशान्तहोता च शोधपत्राणि टीकाग्रन्थानां विविधपक्षान् अवलम्ब्य प्रास्तुवन्।

सामापनिकं सत्रम् प्रो. बनमालीविश्वालमहोदयस्याध्यक्ष्येण तथा श्रीविपिनकुमारझामहोदयस्य सञ्चालकत्वेन सम्पन्नतां गतं यत्र सुश्रीः सुषमा, डा. राधावल्लभशर्मा, सुश्रीः स्वीटी रानी, श्रीराजेशशर्मा, श्रीमती गगनेश्वरी, डा. गणेशशंकरविद्यार्थी, श्रीनाथधरद्विवेदी, डा. नरेशशर्मा,डा. रामनारायणठाकुरः, श्री-अरुणदीपः, सुश्रीः रीना, सुश्रीः मनुबाला तथा सुश्रीः मीनाक्षी शर्मा टीकासंपदामुपयोगिता तथा तदीयविभिन्नपक्षा इत्यादिविषये शोधपत्राणि अपठन्।

सर्वाण्यपि सत्राणि महत्त्वपूर्णपरिचर्चाभिः समायोजितानि। अन्ते डा. सुशान्तहोतृवर्येण सत्रीयविवरणं प्रस्तुतम्। संगोष्ठ्याः संयोजनं डा.सुज्ञानकुमारमाहान्तिद्वारा कृतम्। शान्तिमन्त्रेण सह कार्यक्रमः समाप्तिमगात्।

# वेदाः

-संदीपकुमारउपाध्यायः

चत्वारः वेदाः भवन्ति। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति। एकैकस्यापि संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद् इत्येवं विभागाः सन्ति। वेदाः उत्कृष्टाः साहित्यकृतयः भवन्ति। तानि च सूक्तानि प्रतिभावतां ऋषीणां योगदानानि भवन्ति। एकैकस्यापि सूक्तस्य ऋषिः, छन्दः, देवता इति त्रितयमस्ति।

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। भारते धर्मव्यवस्था वेदायत्तैव। वेदो धर्मनिरूपणे स्वतन्त्रभावनप्रमाणम्, स्मृत्यादयस्तु तन्मूलकतया। श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी। न केवलं धर्ममूलतयैव वेदाः समादृताः, अपि तु विश्वस्मिन् सर्वप्राचीनग्रन्थतयाऽपि। प्राचीनानि धर्मसमाज -व्यवहारप्रभृतीनि वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते।

प्रधानतया वेदो द्विविधः मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्रसमुदाय एव संहिताशब्देन व्यवहृतः। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव। स चायं ब्राहमणभागो यागस्वरूपबोधकतया वैदिकविधिप्रयोगविवरणया च प्रथितः। ब्राह्मणग्रन्थोऽपि त्रिधा विभक्तो भवति- ब्राह्मणम्, आरण्यकम् उपनिषदश्च। यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः। अरण्ये पठिताः यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभाग आरण्यकानि। उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि, अयमेव भागो वेदस्यान्तरूपतया वेदान्त इत्युच्यते। ब्राह्मणभागो गृहस्थानामुपयोगी, आरण्यकभागो वानप्रस्थमाश्रितानाम्, उपनिषद्भागश्च संन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते।

अनादिनिधनाः वेदाः ब्रह्मणः चतुर्भ्यः मुखेभ्यः निस्सृता इति प्राक्तनैः निरूपितम्।

वेदानां रचनाकालः -

प्राचीनाः भारतीयाः विद्वांसो वेदानपौरुषेयान् मन्यन्ते, तेषां मते वेदरचनाकालविचारो निरर्थको दुरर्थकश्च। पाश्चात्त्यविद्वांसो यथाबुद्धिवैभवं वेदरचनाकालं निर्धारयन्ति, पाश्चात्त्यविचारसरणिविदो भारतीया अपि तेनैव मार्गेण वेदकालं निर्णेतुं यतन्ते। अत्र तद्विषयका कतिचन विचाराः प्रस्तूयन्ते।

मैक्समूलरमतम् -

मैक्समूलरमहोदयस्य मतेन ऋग्वेदस्य रचना 1150 ई.पू. समीपे जाता। बुद्धधर्मोदयात् प्रागेव च ब्राह्मणग्रन्था अपि व्यरच्यन्ते। बुद्धेन ब्राह्मणग्रन्थेषु विवेचितानामेव यागविधीनां कट्वी आलोचना क्रियते स्म, अपि चोपनिषत्समर्थितं कतिपयतत्त्वजातमात्मसात् क्रियते स्म' अतो बुद्धात् पूर्वतना (500 ई.पू.) एव ब्राह्मणोपनिषद्भागाः सम्भवन्ति।

वैदिकसाहित्ये चत्वारि युगानि- छन्दोयुगम्, मन्त्रयुगम्, ब्राह्मणयुगम्, सूत्रयुगञ्च। प्रत्येकयुगविकासे तेन वर्षशतद्वयं कालः कल्पितः, तदनुसारेण बुद्धात् 600 वर्षतः पूर्वं छन्दोयुगस्यास्तित्वं समायाति। अतः ऋग्वेदस्य रचना 1150 ई.पू. समायात् पश्चात्कालिकी न सम्भवतीति सम्प्रति ऋग्वेदस्य जातस्य 3200 वर्षाणि जातानीति कथयितुं शक्यमिति तदाशयः। मैक्समूलरमहोदयेनायं कालः सम्भाव्यरूपेणोक्तो न तु निश्चयरूपेण, परं तदनुसारिणः पाश्चात्त्यास्तदीयैरेव तर्कैः कालममुं निश्चयरूपेण कथयितुं प्रवृत्ताः।

डा. अविनाशचन्द्रदासमतम् -

अयं महानुभावः वेदे निर्दिष्टानि अनेकानि भूगर्भशास्त्रीयतत्त्वानि विशेषतः आर्यावर्ततश्चतुर्दिक्षु चतुः समुद्रीस्थितिमाधारीकृत्य गणनाद्वारा वेदस्य समयं 25 सहस्रसंवत्सरपूर्वं मन्यते। इदमीयं मतम् 'ऋग्वेदिक इण्डिया' (Rigvedic India) नामके पुस्तके व्यक्ततयाऽनेन प्रतिपादितम्।

वेदस्थितज्यौतिषतत्त्वाधारं मतम् -

भारते षड् ऋतवो भवन्ति। अमी ऋतवः सूर्यसंक्रमणनिमित्तकाः। इदमपि प्रसिद्धं यत् प्राचीनकालादधुनापर्यन्तममी ऋतवः पश्चात्सर्पन्ति, अर्थात् पूर्वं यत्र नक्षत्रे यस्यर्त्तोरुदयो जायते स्म सम्प्रति स एवर्त्तुस्ततः पूर्ववर्तिनी नक्षत्रान्तरे उदितो भवति। पुराकाले वसन्तो वर्षादिरभवत्, अत एव तस्य प्रशस्ततया भगवद्विभूतिभाव उक्तो गीतायां- 'ऋतूनां कुसुमाकरः' इति। सम्प्रति वसन्तसम्पातः मीनसङ्क्रान्तिकालादारभते, मीनसङ्क्रान्तिश्च पूर्वभाद्रपदनक्षत्रस्य चतुर्थचरणे भवति। सेयं स्थितिर्नक्षत्राणां क्रमशः पश्चात्सर्पणेनोत्पन्ना। पूर्वं कदाचिद् वसन्तसम्पातः उत्तरभाद्रपदरेवती-अश्विनी- भरणी-कृत्तिका- मृगशिरः प्रभृतिषु नक्षत्रेष्वासीत, ततः पश्चात्सर्पन्नयं वसन्तसम्पातः साम्प्रतिकीं स्थितिमनुप्रपन्नः।

वेदशब्दार्थः -

विद्यन्ते धर्मादयः पुरुषार्थाःयैस्ते वेदाः, इति बहवृक्प्रातिशाख्यम्।

सायणस्तु अपौरुषेयं वाक्यं वेद इत्याह। इद्प्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेद इति भाष्यभूमिकायामुक्तम्। तत्र प्रमाणमपि तत्रैवोक्तम्।

प्रत्यक्षेणानुमेत्या वा यस्तूपायो न विद्यते ।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

आम्नायः, आगमः, श्रुतिः, वेदः इति सर्वे शब्दाः पर्यायाः ।

वेदशब्दस्य पञ्चार्था सन्ति -

विद् = ज्ञाने,
विद् = विचारणे
विद्लृ = लाभे ( धर्मः, अर्थः, कामः, मोक्षः )।
विद् संज्ञाने= तृणतः ब्रह्मणः विशेषज्ञानपर्यन्तम्।
विद् चेतनाख्यानयोः=वेद आत्मानुभूतेः प्राप्तिस्रोतः।

सोऽयं वेदस्त्रयीति पदेनापि व्यवह्रियते -

वेदरचनायास्त्रिप्रकारकत्वेन त्रयीति कथ्यते। या खलु रचना पद्यमयी सा ऋक्, या गद्यमयी सा यजुः, या पुनः समग्रा गानमयी रचना सा सामेति कथ्यते, तदुक्तं च जैमिनिना - तेषामृग् यत्रार्थवशेन पादव्यवस्था। गतिषु सामाख्या। शेषे यजुः शब्दः' इति। द्वितीयाध्याये प्रथमपादे 32-33-34

सूत्राणि यास्कस्तु - ता ऋचः परोक्षकृताः प्रत्यक्षकृताः आध्यात्मिक्यश्चेति भेदात् त्रिविधाः। ऋकशब्दोऽत्र मन्त्रवचनः। यासु प्रथमपुरुषक्रियास्ताः परोक्षकृताः, यासु मध्यमपुरुषक्रियास्ताः प्रत्यक्षकृताः यासु चोत्तमपुरुषक्रियास्ता आध्यात्मिक्यः ' इति। अतः यत्र कुत्रापि प्राचीनग्रन्थे वेदार्थे 'त्रयीति पदं प्रयुक्तं तत्र सर्वत्र रचनात्रैविध्यं मनसि कृतं बोध्यम्। यत्तु केचन 'ऋग्यजुः सामाख्यास्त्रय एव वेदाः पूर्वमासन् तद्यथा -'

अग्नेरऋचो वायोर्यजूंषि सामादित्यात। छा. ब्रा.6/17
अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम्॥ मनु. 1/13

अतो वेदानां त्रित्वादेव तत्र त्रयीति व्यवहारो वास्तवो न प्रकारभेदकृतः इति तदयुक्तम्, ऋग्वेदेऽपि अथर्ववेदनामोल्लेखदर्शनात्। भगवता पतञ्जलिनाऽपि 'चत्वारो वेदाः साङ्गाः सरहस्याः' इति पस्पशाह्निके स्पष्टमुक्तम्। छान्दोग्यब्राह्मणे मनुस्मृतौ च यज्ञोपयोगिनो वेदा एव परामृष्टाः, नाभिचारिकः सामवेद इति त्रित्वमेवोक्तम्, एवं परत्रापि। जैमिनिस्तु मन्त्राणां विप्रकारकतामेव लक्षितवान्, न वेदसंख्यां व्यवस्थापितवान्। अतो वेदाश्चत्वार एव, त्रयीति व्यवहारस्तु प्रकारकृतः। अथर्ववेदीयमन्त्रा अपि।

ऋग्वेदस्य पदपाठः -

वेदेषु आदिमः ऋग्वेदः हिन्दुधर्मस्य मूलग्रन्थः अस्ति। तस्य श्लोकाः विविधदेवानां सम्बद्धाः - यथा इन्द्रः, अग्निः, वायुः इत्यादयः। ऋग्वेदस्य 10589 संहिताः, 1028 सूक्तानि च 10 मण्डलैः विभाजिताः सन्ति। महामुनेः व्यासस्य निर्देशे पैलः ऋग्वेदस्य संहितानां निर्माणम् अकरोत्।

आर्याणां कुरुषु अधिनिवेशकाले संग्रथितो यजुर्वेदः इति अभिप्रायः। यजुर्वेदस्य अध्वरवेद इति नामान्तरमस्ति। यजुषः एकोत्तरशतं शाखाः सन्ति इति पतञ्जलिः प्रपञ्चहृदयकारः च प्रस्तौति। वाजसनेयापरनामा कृष्णयजुर्वेदः गद्यपद्यात्मकः। यदीया रचना विश्ववश्या देदीप्यते।

सामः - सान्त्वेन इति धातोः निष्पन्नं सामपदम्। सा इति ऋक्सूचकतया अम् इति गानम्। हराबिव्यञ्गकतया च व्याख्यां केचिद् वदन्ति। सामवेदस्य एकसहस्रं शाखा आसन् किल। प्रपञ्हृदयकारस्यकाले द्वादशशाखाभ्यः अन्याः नष्टाः इदानीम्तु केवलं तिस्रः शाखाः समुपलभ्यन्ते। सङ्गीतस्य उद्भवः सामगानात् इति विचक्षणा आचक्षते। सामगानेऽपि सप्तस्वराः एव भवन्ति। ते आधुनिकशास्त्रीयसङ्गीतसंविधानात् आरोहावरोहणक्रमे किञ्चिदिव व्यत्यस्ताः दृश्यन्ते। खरहरप्रियारागतुल्याः सामगानस्वराः कुष्टं (प्रथमं), द्वितीयं, तृतीयं (मध्यमम्), चतुर्थं, मन्द्रं (पञ्चमम्), अतिस्वार्यं(षष्ठम्), अतिस्वरम् (अन्यं) एते सप्तस्वराः। सामगानालापने गायकैः हस्ताङ्गुलिभिः मुद्राः अभिनीयन्ते एताभ्यः मुद्राभ्यः स्वरस्थानानि मात्राश्च प्रतीयन्ते।

ब्रह्मपुत्रेण अथर्वेण समाहृतम् इति अथर्ववेदः। अथर्वाङ्गिराः, ब्रह्मवेदः इत्येते नामान्तरे। आथर्वसंहितायाः द्वे शाखे स्तः। शौनकीयशाखा, पैप्पलादशाखा चेति। भूर्जपत्रेषु शारदालिप्यां लिखितस्य अथर्ववेदस्य पुरातनं पुस्तकं काश्मीरेभ्यः सम्पादितम्। तद् अधुना ट्यूबिङ्ग्न् सर्वकलाशालायाः ग्रन्थशेखरे अस्ति।

अधिकारः

शास्त्रम् तु अष्टमे ब्राह्मणम् उपनयीत इति उक्त्वा आनन्तरं सः वेदाध्ययनार्थम् अधिकारत्वं प्राप्नोति इति वदति।

सनातन धर्मस्य प्राणवत्, विश्वस्य महानतमः आदिग्रन्थः वेदः न केवलं हिन्दुधर्मस्य अपितु सर्वेषां धर्माणां मूलमस्ति। 'वेदोखिलो धर्ममूलम्' अर्थात् समेषां धर्माणाम् उत्पत्तिः अनेन एव अभवत् इति।

उक्तमेव अस्ति- धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः।

वस्तुतः वेदानां प्रादुर्भावः सृष्ट्यारम्भे एव अभवत् किन्तु केचन पाश्चात्यीयानाम् अभिप्रायम् अनुमन्यमानाः एव अस्माकं विद्वांसः अपि वेदानां रचनाकालं केवलं विगत चतुर्पञ्चसहस्रवर्षाणि एव मन्यन्ते। ते अवधानं न ददति यत् वेदानां परम्परा अपि वर्णिता अस्ति। अनेन क्रमेण ईश्वरेण ब्रह्मा, तेन व शिष्ठ अपि च अनेनैव क्रमेण शक्तिः, पराशरः, द्वैपायनः च वेदानां ज्ञानं प्राप्तवन्तः। वेदानां विस्तारकारणात् एव तस्य नाम वेदव्यासः इति अभवत्।

शेषभागःसप्तमपुटे

# नैषधेऽश्लीलवर्णनम्?

–अरविन्दकुमारतिवारी

श्रीहर्षं नमस्कृत्य दमयन्तीं नलं नृपम्।
दृष्टं वर्ण्यते मित्र नैषधेऽश्लीलवर्णनम्।।

अहो संस्कृतकवीनामुच्छृङ्खलता! सम्भवतः कवीनां स्वान्तर्त्यं सङ्कोचयन्नेव साहित्यशास्त्रकारैर्नियमः कश्चनाविष्कृतः। अनियमानामेव नियमनाय रसाभासः कल्पितः-

अनौचित्यप्रवृत्तस्य आभासो रसभावयोः।
उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम्1।।

आचार्यविश्नाथो धन्यो यो हि मुनिगुरुपत्नीविषयकरतिवर्णनमनौचित्यं मनुते। यदि कश्चिद् ब्रूयात् यत् नलो न मुनिनैव च गुरुतो नात्र दोषो रतिवर्णने। परन्तु श्रीहर्षोण स्वयमेव यादृशं रूपं नलस्योपकल्पितं तेन तु नलस्य देवत्वं सिद्ध्यति।

किं च काव्यदोषेऽश्लीलदोषोऽपि दर्शितो यथा- पदांशगताश्लीलतामाविष्करोति मम्मटाचार्यो ब्रूते च

अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः।
परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव।।2

पेलवशब्दस्यैकदेशमधिकृत्य व्रीडाव्यंजकाश्लीलता स्वीक्रियते। अत्रैव तेनाचार्येण अश्लीलताजन्यविसन्धिदोषनिरूपणावसरे पद्यमेकमुदाहरति। तद्यत्-

वेगादुड्डीय गगने चलण्डामरचेष्टितः।
अयमुत्तपते पत्री ततोऽत्रैव रुचिङ्कुरु।।3

विसन्धिदोषेऽस्मिन् द्वितीयपादस्थलण्डाशब्दस्य किं च चतुर्थपादीयचिड्कुपदस्य च क्रमाल्लिंगयोनिसूचनाद् दोषो मन्यते। विचार्यताम् आचार्या अङ्गावयवनामग्रहे न सहमतिं दर्शयति, परन्तु कवयस्तु तान्नियमान् दूरीकृत्य स्वातन्त्र्या न विरमन्ते वणयन्त्येव यथेच्छमवर्णनीयम्। अवलोक्यतां महाकविनोपाधिना विभूषितः कालिदासः शृङ्गारवर्णने कियान् रुचिमान् दृश्यते। अत्यल्पमप्यवसरमाकलय्यासौ त्वरितमेव स्वमनोगतभावान् प्रकटीकरोति। मेघदूते तु -

प्राक्षास्वादो विवृतजघनां को विहातुं समर्थः।[4]

अथ च शाकुन्तले तु 'रक्षितव्या खलु प्रकृतिपेलवा' प्रियसखी[5] 'चूतेन संश्रितवती नवमालिके यमस्यामहं त्वयि च सम्प्रति वीतचिन्ता'[6] अश्लीलशब्दप्रयोगेण किं वर्णयितुमीहते न जाने। शकुन्तलं पाठयता क्रियते शब्दवियर्ययोऽस्माभिरिति द्वयस्यापि प्रायषः। चूतशब्दस्य हि पश्चिमोत्तरप्रदेयशे वान्यस्मिन् भागे योनिवाचकत्वात् प्रतिविद्यार्थिपरिबोधविषयत्वाच्चेति।

बहव एतादृषा अपि सन्ति संस्कृतजगति ये श्रुत्वेदं कुपिता भविष्यन्त्येव मयि तथापि न कापि हानिः। इदमेव दृष्ट्वा खिन्नमना आचार्य आनन्दवर्धनो ध्वन्यालोके स्पष्टयति यत् प्रतीयमानं ध्वनितत्वन्तु शरीरावयवातिरिक्तं किंचिदपरं युवतिजनलावण्यमिवास्ति। यथा-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।। 7

अत्र विमृष्टं यच्छरीराङ्गवर्णनं न ध्वनिः, शरीरावयवानां मूर्तपदार्थत्वात् ध्वनेष्चामूर्तभावरूपत्वाच्चेति। लावण्यं भावरूपं न द्रव्यरूपम्। काव्ये चारुतानिवेशनाय लावण्यमिव ध्वनिराविश्करणीयो न तु कुचादयः शरीरावयवाः दर्षयितुं प्रयासो विधातव्यः। आनन्दवर्धनो निगदति कालिदासविषये यत्-

तथाहि महाकवीनामप्युत्तमदेवताविषयप्रसिद्धसम्भोगशृङ्गारनिबन्धनाद् अनौचित्यं शक्तितिरस्कृतं ग्राम्यत्वेन न प्रतिभासते। यथा कुमारसम्भवे देवीसम्भोगवर्णनम्। 8

यद्यपि अत्र श्रीमतानन्दवर्धनेन महाकविः कालिदासो ग्राम्यदोषाद् वारितस्तथापि अनौचित्यमित्युक्तमेव। नेह कुमारसम्भवगतवर्णनमिहाविषयत्वेन प्रस्थाप्यते नैषधीयस्यैव वर्ण्यविशयत्वादिति।

श्रूयते यन्महाकविर्देवीसम्भोगवर्णनानन्तरं कुष्ठी संजातस्तन्निवारणार्थं तेन रघुवंशं विरच्य मुक्तोऽभवदिति। मयूरभट्टस्यापि वृत्तान्तो न कस्यापि दृष्टेरविषयः। अनेन महाशयेन तु स्वभगिनीं प्रति अश्लीलपद्यपठनादुःखमवाप्तं पद्यांश्चायमस्ति- कुचप्रत्त्यासत्त्या हृदयमपि ते चण्डि कठिनम्।

तन्निवृत्त्यर्थं च सूर्यशतकमरच्यतेति वदन्ति विज्ञाः। काव्यं सहृदयहृदयाह्लादकं रचनीयं नैव नारीणामङ्गावयवानामुन्मुक्तवर्णनेनान्न्दवाप्तिः। किं च काव्यप्रणयनस्य प्रयोजनं शिवेतरक्षतिर्न तु शिवेतरावाहनमिति मम्मटेन न कथितम्? मन्यतां कालिदासो मयूरभट्टश्चोभावपि मम्मटपूर्ववर्तिनौ, किन्तु महाकविः श्रीहर्षस्तु समकालिकोऽस्याचार्यवरस्येति। किं नालोचितमनेन काव्यप्रकाशतत्त्वम्?

मम्मटश्रीहर्षविषयिणीं किंवदन्ती नेह ममाभीष्टविषयः। अतो नेह प्रतन्यते सा, कस्यचिद् विदुषो जल्पनमिति मत्वा।

नैषधीयमहाकाव्यं परमविदुषा श्रीहर्षेण विरचितमवाप्यते। अत्र नलदमयन्त्योः प्रेमवर्णनमेव कवेर्लक्ष्यमवलोकितम्। अतोऽसौ प्रतिपलं शृङ्गारवर्णनाय व्याकुलो दृश्यते। हन्त! येन केन ब्याजेन स्वमनोभावं प्रदर्शयत्येव। तावद् भा भारवेर्भाति यावन्माघस्य नोदयः। उदिते नैशधे काव्ये क्व माघः क्व च भारविरित्यपि नैषधकाव्येन साकं श्रीहर्षं प्रशंसति। किं च नैषधं विद्वदौषधमपि श्रीहर्षस्य वैदुष्यमेव प्रकटयति। सत्यमपि सर्वमिदमाभाति परन्तु, यादृशी अश्लीलतात्र दृष्टा सा तु महाकवेः श्रीहर्षस्य कवित्वं दूषयतीव। श्रीहर्षेण पवित्रकथानको महाभारताद् गृहीतः। यस्य स्मरणेन कलिनाशो भवति। यथा-

कर्कोटस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम्।। 9

स्वयमपि श्रीहर्षो मनुते यत् नलदमयन्तीकथेयं पापमलाक्षालनतत्परा। तेनोक्तमादावेव-

पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयैव तत्कथा।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति।। 10

पद्येनानेन नलं प्रति श्रीहर्षस्य श्रद्धाभावं प्रकटीभवति। तस्मादवश्यमेव नलो गुरुरूपो न कस्मान्मन्यताम्? अस्यामवस्थायां केवलं तन्नाम्ना विमुक्तशृङ्गारवर्णनमौचित्यपरमथावानौचित्य- परमिति स्वयमेव समालोचकैः परिशीलनीयम्। अहन्तु वर्णविन्यासमातन्वानो नो दोषं महाकवेराविष्करोमि। अपितु शास्त्रसम्मतं विभावयामि संस्कृताक्षरैरिति। सन्दर्भेऽस्मिन् प्रख्यातदार्शनिकेन ओशोमहाशयेन कथितं स्मरामि। सम्भोगात्समाधिपर्यन्तमिति शीर्षकेण लिखिते पुस्तके पठितम्। असौ ओशो निगदति यत् न कामाल्लोको मुक्तः।' अनेके सधवः सन्नायासिनश्च यदा रहसि मिलन्ति तदा कामवृत्तमेव पृच्छन्ति। अहं भवामि विस्मितः इदं विज्ञाय यदिमे निरन्तरं यस्य विरोधे भाषन्ते, ते स्वयमेव चित्तशुद्धा न वर्तन्ते''।11 किमनेन ज्ञायते? अस्तु ममाभिधानीयं नेदमपितु नैषधेऽश्लीतान्वेषणमिति, तदेव वर्णयामि। दृश्यते यद् बहुभिराचार्यैः शरीरावयवानां वर्णनं काव्ये सुमतम्। यथा-

वेणीधम्मिलसीमन्तभालश्रवणनासिका।
कपोलाधरनेत्रभ्रूकटाक्षदशनोक्तयः।।
कण्ठबाहुकरौजनाभ्योर्मध्यं वलित्रयम्।
रोमालिश्रोणिजङ्घोरुगतिक्रमनखाः क्रमात्।।12

परन्तु वर्णनमिदं न गुरुमुनिदेवताविषयकमुचितमिति मत्वा रसाभावाभासो मतः। श्रीहर्षः सहर्षं दमयन्त्याः प्रत्यङ्गं तृतीये सर्गे सप्तमे च सविस्तरमवर्णयदिति नैषधाध्येता को न जानाति? नैतदिह दर्श्यते। मान्याः यद्धि तेन षष्ठे सर्गे कृतं तत्त्वश्यमेव महाकवेरनौचित्यं द्योतयति। बहुधात्मानं ततो निवार्यमाणोऽप्यात्मनाहं न विलिखितुं जहामि। अतः श्रीहर्षमभिवाद्य नैषधगतमश्लीलांशमव-

गुण्ठनवन्निजमहिलाजनमिहावगुण्ठनरहितं करोमि।

षष्ठे सर्गे राजप्रासादं गतो नलोऽदृश्यरूपस्तेन महाकविना कथमेवंविधनिन्दनीयकर्मणि नियुक्तः? नैव परिज्ञायते। यं नलं पूजिलं मन्यते तमेवान्तःपुरं प्रेषयित्वा परस्त्रीणां शरीरावयवान् दर्यति। हन्त! अवलोक्यतां पद्यमिदम्-

अन्तःपुरान्तः स विलोक्य वालां कांचित् समालब्धुमसंवृतोरुम्।
निमीलिताक्षः परया भ्रमन्त्या सङ्कटमासाद्य चमच्चकार।। 13

अर्थाद् अन्तःपुरमुपस्थितो नल उद्वर्तनार्थं विवृतजघनां यां कामपि वालां विशेषेण दृष्ट्वा अपरया कयाचिद् वालया सङ्घर्षं स्पर्शमनुभूय चकितो भवति। निमीलिताक्षपदेन शृङ्गारातिरेको ध्वन्यते न तु ततो निवृत्तिर्विलोक्यपदोपलब्धेर्महाभारतेऽपि प्रसङ्गस्यास्यानवाप्तेश्चेति। आदर्शपुरुषो नैतत्कर्तुं प्रभवति। श्रीहर्षोण नलो बलान्नियोजित इति ब्रवीमि। किं नात्र असंवृतोरुपदमश्लीलतामभिसूचयति?

किं च स्तनं वर्णयन् ब्रूते-

पश्यन् स तस्मिन् मरुतापि तन्व्याः स्तनौ
परिस्रुष्टुमिवास्तवस्त्रैः।
अक्षान्तपक्षान्तमृगाङ्कमास्यं
दधार तिर्यग् वलितं विलक्षः।।14

अर्थादन्तःपुरे वायुना कुचस्पर्शकामनया सुन्दर्याः स्तनावनावृतौ, अथ च नलः पश्यन् स्वमुखं ततोऽवारयत्। अत्रानावृतस्तनवर्णनं किमश्लीलतां न दर्शयति? अतः परमग्रेऽवलोक्यताम्। महाकविश्रीहर्षो वर्णयति कचकलापसज्जरतायाः कस्याश्चिद् भुजमूलं ततः कुचानुलेपनम्, किं च मृदुलपिनद्धेन कंचुलिकाया दृश्मानो नाभिदेशम्, क्रमात् पश्यन् नलस्ततस्स्वदृष्टिमपसारयति। मान्याः! किं नलेनान्तःपुरगतेनेदं दर्शनीयमुचितमनुचितं वा विचारयन्तु। अत्रानुलेपनकुचावलोकनं नाभिदेशदर्शनं चोभयमश्लीलतासूचकं प्रतीयते? नात्रैव विरमते महाकविः, असौ तु कामोद्रेकतां प्रकटयन् नलो निषिद्धे कर्मणि नियोजयति। तदिदमाकर्ण्यताम्-

सङ्कटयन्त्यास्तरसात्मभूषा- हीराङ्कुरप्रोतदुकूलहारी।
दिशां नितम्बं परिधाप्य तन्व्याः तत्पापसन्तापमवाप भूपः।। 15

अत्रान्तःपुरेऽदृष्टो नलो हीरकमाभूषणधारी तदाभूषणकोणभागेन आगच्छन्त्याः कस्याश्चित् सुन्दर्याः दुकूलं धृतम्, दुकूलमोचनतत्परा सा नितम्बेन दिग्मबरा बभूव। ततश्च नलो नितम्बदेशे वस्त्रेण परिधाप्य सन्तापमनुभूतवान्। नग्ननितम्बप्रदर्शनं किं महाकवेः कीदृशं भावं व्यनक्ति? नूनमेतदश्लीलवर्णनं मद्दृष्ट्या।

विंशे सर्गे नलदमयन्तीसंवादे तु महाकविना स्वसुकवित्वमेवादर्शि, तदिमवलोक्यताम्!

यच्चुम्बति नितम्बोरु यदालिङ्गति च स्तनौ।
भुङ्क्ते गुणमयं तत्ते वासः शुभदशोचितम्।। 16

अत्र वस्त्रव्याजेन नितम्बस्तनादिशरीरावयवानां वर्णनमश्लीलतामुपकल्पयति। नात्रैव विरमते महाकविः कामसन्तप्तः नलं वर्णयन् स लिखति चाग्रे-

लीनचीनांशुकं स्वेदि दूरालोक्यं विलोकयन्।
तन्नितम्बं स निश्श्वस्य निनिन्द दिनदीर्घताम्।।17

दर्शयति श्रीहर्षो नितम्बं किं च मदनदह्यमानहृदयेन नलेन दिवसोऽयं कदा गमिष्यतीति जल्पयति। नैतदस्ति अश्लीलतासूचकं किं भो! धन्यो महाकविरयं श्रीहर्षो यो हि पूजनीयो नलोऽङ्गपीडापीडितो दमयन्तीमालिङ्गालिङ्गेति प्रवदन् नैषधे दर्शितः। तद्यत्-

आलिङ्गालिङ्ग तन्वङ्गि मामित्यर्द्धगिरं प्रियम्।
स्मित्वा निवृत्य पश्यन्ती द्वारपारमगादसौ।। 18

अहो विज्ञापयनीयमिदं विज्ञापयामि सुमतो नल आत्मज्ञानी नैषधे तद्यत्-

आत्मवित्सह तया दिवानिशं भोगभागपि न पापमवाप सः।
आहृता हि विषयैकतानता ज्ञानधौतमनसं न लिम्पति।।19

कथं श्रीहर्षो नल एवंरूपो दर्शित इत्यस्य प्रश्नस्योत्तरं नैव लब्धुं शक्यते। अनुमिनोमि यदयमत्राष्टादशसर्गे कामवर्णनमभिलषितवान् स्यात्। तन्मनसि नलस्य गौरवपदमुपागतं भवेत्। तद्विचार्य नलस्य प्रशंसनीयपदरक्षणाय कदाचिदिदं तेन कृतं स्यात्। परन्तु आत्मज्ञानिनो न विषयभोगे व्याकुला अवलोकिताः। तत्रापि स्त्रीरतिसुखावाप्तये पुनः पुनः पिपासुतया नलशिचत्रितः न तन्मनोज्ञम्। अयमात्मवित्तु कियान् कामाभिलाषी वर्तते इति समुल्लिखितुमपि नाहं समर्थोऽस्मि। कामातृप्तिदर्शनादस्य कुत आत्मज्ञानत्वम्। मन्ये स्वयमेव निजकामशास्त्रबोधो दर्शितस्तेन महाकविना नलव्याजेनेति। अन्यथा न कदापि आत्मज्ञानी क्वचिदपि विधिवद् रतिसुखाकांक्षी दृष्टः, रत्यादिविषयपरित्यागेवात्मज्ञानोपलब्धेः। नैवाचरति कश्चिदिह आत्मवेत्ता-

मिश्रितोरु मिलिताधरं मिथः स्वप्नवीक्षितपरस्परक्रियम्।
तौ ततोऽनु परिरम्भसम्पुटे पीडनां विदधतौ निदद्रतुः।20

न मया दर्शनविद्यार्थिना क्वचिदपि शास्त्रे आत्मवित् कुचमर्दनव्यस्तो दृष्टो नैव चाधरपानाभिलाषी विलोकितः। अयं कीदृश आत्मज्ञानी यो हि दिवसे रतिकामनया पीडितो दृष्टिमार्गे आगच्छति। अयन्तु सर्वदा सर्वत्र अतृप्तकामः कुतः आत्मज्ञानी भो।

यद्यपि श्रीहर्षेण नलमुखादिदमुद्घोष्यते यद् वर्णनमिदमनौत्यपरं तथापि का विवशता यद्वशात्तेनैवं कृतम्। यथा-

अहो अनौचितीयं ते हृदि शुद्धेऽप्यशुद्धवत्।
अङ्कः खलैरिवाकल्पि नखैस्तीक्ष्णमुखैर्मम।। 21

अहो सत्यमाह महाकविः स्वदोषं परिशरसि कुर्वाणो मेघदूते-

कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु। 22

किमहं कथयानि परस्य काव्ये दोषदर्शी काव्यतत्त्वज्ञो महान् मम्मटोऽपि स्वविषयविवेचनाय काव्यप्रकाशे कीदृशमुदाहरणं प्रदत्तवानिति न कस्यचिदपि दृष्टेरविषयः। असौ तु सामाजिकीं व्यवस्थामेव दूषयन् ब्रवीति काव्यपरिभाषोदाहरणावसरे-

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपाः 23

इति नाहमतः परं वक्तुमभिलाषामि सर्वजनहृदयनिहितत्वादस्य विश्रुतस्योदाहरणस्येति। अन्ते महाकवीन् साहित्यविदश्च प्रणमन् विरमामीति।

सन्दर्भाः


1- साहित्यदर्पणे 3/263,
2-काव्यप्रकाशे उल्लासः 7 पृ0290
3- तत्रैव उल्लासः 7 पृ0305,
4-मेघदूते पूर्वमेघे 44
5- अभिज्ञानशाकुन्तले चतुर्थाङ्कीयविष्कम्भान्ते
6- तत्रैव 4/13 ,
7- ध्वन्यालोके 1/4,
8- तत्रैव उद्योत 3 पृष्ठ 191
9- महाभारते वनपर्वणि अ079 श्लोकः10
10-नैषधीयचरिते 1/9 ,
11-सम्भोगसे समाधितक पृष्ठ सं0 52,
12-काव्यकल्पलतिकावृत्तौ 1/5/58-59,
13-नैषधीयचरिते 6/13
14-तत्रैव 6/18
15-तत्रैव 6/28
16-तत्रैव 20/147
17-तत्रैव 20/148
18-तत्रैव 20/155
19-तत्रैव 18/2
20-18/147
21-20/146
22-मेघदूते पूर्वमेघे 5
23-काव्यप्रकाशे उल्लासे 1 सूत्रं 1

# श्रीमद्भगवद्गीतायां जीवात्मतत्त्वयोः विवेचनम्

-तिलकराजः, शोधछात्र, राष्ट्रियसंस्कृतसंस्थानम्

श्रीमद्भगवद्गीयां जीवस्य आत्मनश्च विवेचनं विस्तरेण विहितम्। जीवः चैतन्यात्मकोऽस्ति, अतः परमेश्वरस्य पराप्रकृतिरूपा उत्कृष्टा विभूतिश्च वर्तते। जीवः एव क्षेत्रज्ञोऽस्ति । यथा जले प्रतिबिम्बतसूर्यः आकाशे स्वस्थितिं ज्ञापयति तथैव आत्मा स्वानुभूतिं विविधलक्षणैः शरीरे कारयति। उक्तञ्च गीतायाम्-

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ।।

इत्यनेन श्लोकेन विदितं भवति यद् जाग्रत-सुषुप्ति-स्वप्नावस्थात्रयं भवति। सुषुप्त्यवस्थायां मनः बुद्धिश्च शान्तावस्थायांतिष्ठति। जाग्रतावस्थायां यः अनुभवं कारयति सः एव आत्मतत्त्वमस्ति। सः एव आस्माकं शरीरस्य साक्षी विद्यते। सः न कदापि उत्पद्यते।, न म्रियते। न तस्य कदाप्यभावो भवति।उक्तञ्च -

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।

जीवशरीस्थोऽपि आत्मा अजन्मा, नित्यः, शाश्वतः, पुरातनश्च वर्तते। पुरातनोऽपि सः नूतनः एवास्ति, विनाशशीले प्राणिशरीरे विद्यमानस्यापि तस्य विनाशो न भवति। आत्मा स्वयं जीवशरीरस्य वरणं करोति। कथयति श्रीकृष्णः श्रीमद्भगवद्गीतायाम् -

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नावानि देही।।

आत्मा स्वयमधिकारी अस्ति किन्तु जीवशरीरं विकासरूपं विद्यते। जीवस्यअस्मिन् देहे कौमारप्राप्तिः भवति, ततः कौमारनाशानन्तरं यौवनप्राप्तिः, यौवननाशान्तरं जराप्राप्तिः भवति।परन्तु आत्मा एताभ्यः अवस्थाभ्यः मुक्तोऽस्ति।आत्मा देहनाशानन्तरं देहान्तरं प्राप्नोति। उक्तञ्च गीतायाम् -

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।

जीवः प्रारब्धकर्मणां फलभोगं कृत्वा निवर्तते तदा अन्यशरीरस्य प्राप्त्यर्थमात्मानं प्रेरयति ।फलतः आत्मा पूर्वशरीरं परित्यज्य अपरं जीवशरीरं गृह्णाति। एवञ्चेद् आत्मा सर्वव्यापी, स्थिरः, अचलः, सनातनश्चास्ति। उक्तञ्च-

'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' जीवः आत्मना सम्पृक्तो भवति। अतः यथा एकः एव आत्मा सर्वेषु शरीरेषु विद्यते तथैव जीवोऽपि एकः एव सर्वेषु शरीरेषु विद्यमानोऽस्ति ।जीवस्य नानात्वं गीतायां सम्मतं नास्ति।'जीवोऽयमेक एव ।न तस्य बहुत्वम्' 'यथा एकः सूर्यः सम्पूर्णं जगत् प्रकाशयति तथैव क्षेत्रज्ञः एकोऽपि सर्वाणि क्षेत्राणि भासयति'। जीवः ईश्वरस्य अंशो विद्यते। उक्तञ्च -

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।।
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वार्युन्धानिवाशयात्।।

श्रोत्रादीनि इन्द्रियाणि मनश्च अधिष्ठायाश्रित्य अयं जीवः विषयान् (शब्दानीन्) उपभुङ्क्ते। यथा एकस्मिन् वृक्षे स्थितौ द्वौ पक्षिणौ स्तः- एकः तस्य वृक्षस्य फलं खादति अपरश्च साक्षी भूत्वा तं पश्यति। एवमेव आत्मा अपि अस्मिन् देहे भोक्ता अस्ति, परमात्मा च साक्षी । उक्तञ्च -

श्रोत्रञ्चक्षुः स्पर्शञ्च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते।।

ब्रह्मसूत्रेऽपि प्रतिपादितमस्ति 'नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः' आत्मा परमात्मनः भिन्नः भूत्वा, अविद्यया त्रिगुणयुक्तमायया आवृतः भवति। एतदेव बन्धनं तस्य भिन्न-भिन्नशरीरग्रहणार्थं हेतुः भवति।आत्मनः परिमाणं केशस्य अग्रभागस्य दशसहस्त्रतमांशतुल्यमस्ति इति कथयन्ति शास्त्रज्ञाः। ईश्वरः अन्तर्यामी अस्ति। सः सर्वेषां जीवानां हृदि तिष्ठति। सः सर्वान् जीवान् मायया निजशक्त्या भ्रामयन् भ्रायन् तत् कर्माणि प्रवर्तयति। उक्तञ्च -

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।।

देहान्तरकाले जीवस्य पूर्वकर्माणि विस्मृतिं यान्ति, परन्तु आत्मा सर्वेषां कर्माणां साक्षी भूत्वा तिष्ठति। परमात्मा मायाशक्तिद्वारा पूर्वकर्मानुसारं प्रत्येकं जीवाय उपयुक्तं देहं प्रयच्छति। पूर्वोक्तमुक्तं खलु आत्मा परमात्मनः एवैवांशोऽस्ति। अस्मिन् विषये ब्रह्मसूत्रमपि प्रतिपादयति - 'अंशोनानव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयते एके' ।जीवात्मनि परमात्मनि भेदोऽस्त्यपि नास्त्यपि। यतोहि जीवमात्मनः स्त्रोतः भवगवान् एवास्ति। जीवात्मा भगवतः शाश्वत-सनातनाक्षयांशः वर्तते।'प्रकाशादिवत्तु नैवं परः' यथा सूर्यकिरणाः सूर्याद्उद्भवन्ति परन्तु सूर्यः नैव भवितुं शक्नुवन्ति तथैव आत्मा भगवतः अंशरूपः वर्तते न तु भगवान्। अतः आत्मा शरीरस्य सुख-दुःखानि सहते। परमात्म एतेभ्यः परे वर्तते। प्रत्येकात्मा, परमात्मनोंऽशरूपेण तस्मात् पृथक् भूत्वा पञ्चमहाभूतशरीरे त्रिगुणमयी-मायया बद्धावस्थायां तिष्ठतीति।

अतः एव यथा शीघ्रमज्ञाननिद्रां चेतयित्वा परमात्मनः प्राप्त्यर्थं प्रयत्नः विधेयः। यः कोऽपि आत्मतत्त्वं जिज्ञासति, ज्ञातुं शक्नुते, यःकोऽपि मानवः तं लिप्सति लब्धुं प्रभवति। तदर्थंतपस्या काम्यते सत्यानुरागः बलिष्ठा निष्ठा विमलं च ज्ञानम्अभिलष्यते। नायम् आत्मा वेदाध्यायनेन लब्धुं शक्यो न च सद्धारणाशक्यैव ।साधकः यमात्मानं वृणुते तेनैव स तमवाप्तुमीष्टे ।तं प्रति हि स्वयमेवात्मा स्वकीयं रूपमभिव्यनक्ति ।उक्तञ्च -

नायमात्मा प्रवचेन लभ्यो न मेधया न बहुधा श्रेतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्।।

ब्रह्मणः मूर्तामूर्तभेदेन रूपद्वयम् ।तदस्ति मर्त्यममर्त्यञ्च स्थिरमस्थिरञ्च ।स्वलक्षं लक्षणातीतञ्च। तत् परमात्मा इत्येतदपि उच्यते। अयमेव परमात्मा अविद्याहेतोः बन्धने निपत्य जीवात्मेत्येतदपि निगद्यते। यथा जीवः जाग्रदवस्थातः स्वप्नावस्थायां प्रविशति तथैव सः नैजं स्थूलं शरीरं हित्वा अविद्याप्रभावात् शरीरान्तरं धारयति।

जीवः स्वकर्मप्रभावात् शरीरस्य भिन्नभिन्नच्छिद्रमार्गेण निर्गच्छति । उक्तञ्च-

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षञ्च ये विदुर्यान्ति ते परम् ।।

क्षेत्रेण सह क्षेत्रज्ञयोः जीवात्म-परमात्मनोः यथा भूतानां प्राणिनां प्रकृतेः सकाशात् मोक्षं मोक्षोपायं च ए विदुः ते परं पदं यान्ति। इति।

## २०१५वर्षस्य राष्ट्रपतिसम्मानप्राप्तकर्तॄणां संक्षिप्तपरिचयः (३)

### प्रो.सुधाकरदीक्षितः



प्रो.सुधाकरदीक्षितमहोदयानां जन्म उत्तरप्रदेशस्य मऊजनपदे हरहुआग्रामे 1942तमे खीस्ताब्दे मार्चमासे पञ्चविंशतितमे दिनांकेऽभवत् । भवतां निष्ठवान् वंशपरम्परासनातनसंस्कृत्याः संस्कृतवाङ्मयस्य सेवा निरता आसीत् । भवतां गुरुजनाः श्रीकरपात्रीमहाराजाः, पण्डितराजः श्रीराजराजेश्वरशस्त्रिणः, श्रीहरिरामशुक्लः, श्रीबदरीनाथशुक्लः तथा च पद्मभूषणविभूषिताः श्रीपट्टाभिरामशस्त्रिणः आसन् । भवद्भिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः नव्यन्यायाचार्यपरीक्षायां स्वर्णपदकं प्राप्तम् । स्वकीये छात्रजीवने विभिन्नशास्त्रीयप्रतियोगितासु भागं गृहीत्वा नव्यन्याय-वेदान्त-व्याकरणादिशास्त्रेषु त्रयोदशस्वर्णपदकाः अर्जिताः । भवद्भिः वर्ज्रेभ्यः पूनाविश्वविद्यालये, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये पारम्परिकपद्धत्या न्यायवेदान्तादिशास्त्राणामध्यापनं कृतम् । भवद्भिः जयन्तभट्टस्य न्यायमञ्जर्याः सम्पादनं कृतम् तथा च विविधशोधपत्रिकासु भवतां दर्शन-धर्म-राजनीतिविषयकाः प्रायशः त्रिंशताधिकशोधालेखाः प्रकाशिताः ।

भवद्भिः पञ्चाशतवर्षीय-शैक्षणिककार्यावधौ न्यायरत्नाकरः, वेदरत्नाकरः, महामहोपाध्यायः, महानायकः, करपात्ररत्नः इत्यादयः उपाधयः सम्प्राप्ताः । सम्प्रति भवन्तः 'क्लीनमिडियाफांउडेशनस्य अध्यक्षाः सन्ति ।

पत्राचारसंङ्केतः
बी-37/198, बी-1, वीरदोपुरम्, महमूरगंजः,
वाराणसी-221010, उत्तरप्रदेशः ।
मो. 0651-2361114, 07549063940.

Girish Kumar Bansal,Manager
Vidya Deep Public School
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
सूती खादी व रेडीमेड ऊनी खादी व कम्बल (रेडीमेड) रेशम साड़ी (रिल्ड) रेशम स्पन व रेडीमेड पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ0 प्र0)
शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204




संस्कृतपत्रिकायाः परिचयः

## सेतुबन्धः (त्रैमासिकी संस्कृतपत्रिका)

परिचायकः - चावडा जतीनः
C - 39, हरिमंदिर सोसायटी,
B/H - विसतमाता मंदिर,चाँदखेडा,अमदावाद - 382424

सेतुबन्ध-नामिका एका त्रैमासिकी संस्कृत-पत्रिका विगतवर्षात् गुजरातराज्यस्य कर्णावतीतः प्रकाशिता भवति ।इयं पत्रिका प्रत्येकं तृतीयायां पूर्णिमायां प्रकाशिता भवति ।जैनधर्मावलम्बिनः अस्याः पत्रिकायाः चालयितारः सन्ति ।अस्याः पत्रिकायाः पत्राणि चतुरङ्गीणि सन्ति ।अथ च अस्याः सर्वे पृष्ठाः सचित्राः विलसन्ति ।एवमियं दर्शनतः चेतोहरा पत्रिका ।

इयं पत्रिका द्विधा विभाजिता वर्तते - प्राचीनसेतुबन्धः अर्वाचीनसेतुबन्धश्च ।प्राचीनसेतुबन्धनामके विभागे प्राचीनं साहित्यं प्रकाशनार्थं स्थानं लभते ।ततः अर्वाचीनसेतुबन्धनामके द्वितीये विभागे आधुनिकानाम् कवीनाम् रचनाः प्रकाशनार्थं स्थानं भजन्ति ।

यद्यपि अस्याः पत्रिकायाः प्रतिभागं मूल्यं शतं रूप्यकाणि प्रकाशितमस्ति अत्र, परन्त्वियं विद्वज्जनानाम् कृते प्रायः निःशुल्कमेव उपहृयते प्रकाशितैः । श्री प्रियंकः शाह नामा कश्चित् व्यवसायी अस्याः मुख्यं संपर्कसूत्रं वर्तते ।मान्याः मुनियशरत्नविजय-महाभागाः अस्याः सम्पादनं कुर्वन्ति ।तदर्थमेते एव पत्रादिद्वारा संपर्कसूत्रत्वेन प्रवर्तन्ते ।

अस्याः पत्रिकायाः प्राप्तिस्थानानि त्रीणि सन्ति ।प्रथमं तावत् 'सेतुबन्धः , द्वारा 16, तीर्थभूमि एपार्टमेन्ट, सर्वोदयसोसायटी, म्युनिसिपल स्कुल के सामने, अचेर, साबरमती, अमदावाद-380005 , द्वीतीयं तावत् सेतुबन्धः , द्वारा सिद्धाचल, सेन्ट एन्स स्कुल के सामने, हीरा जैन सोसायटी, साबरमती, अहमदाबाद-380005 , तृतीयं च तावत् 'सेतुबन्धः , द्वारा, भक्ति बिल्डिंग, ग्राऊंड फ्लोर, , दौलतनगर,रोड नं-8, बोरीवली (ई) मुंबई-400066 ।पत्रिकायाः प्राप्तये एतेषु स्थानेषु कमप्येकं स्थानं प्रति संपर्कः करणीयः ।

अधुनैव अस्याः तृतीयः अङ्कः प्रकाशितः । अस्मिन् अङ्के प्रकाशितं यत् वस्तुविवरणम् तत् अस्मिन् चित्रात्मकयोः पृष्ठयोः द्रष्टुं शक्यते ।पत्रिकायाः मुखपृष्ठस्यापि चित्रमत्र संलग्नमस्ति ।

# भारतीयसंवत्सरज्ञानम्

-ज्ञानेश्वरशर्मा

**चैत्रमासि जगद् ब्रह्मा ससर्ज प्रथमोऽहनि।**
**शुक्लपक्षे समग्रं वै तदा सूर्योदये सति।**
**वत्सरादौ वसन्तादौ बलिराज्ये तथैव च,**
**पूर्वाविद्धैव कर्तव्या प्रतिपत् सर्वदा बुधैः।**

इत्ययेन वचनेन प्रचलितईस्वीसन् नववर्षारम्भसिद्धान्तस्य अवैदिकत्वमनौचित्यञ्च सिद्धयति। किञ्च भास्कराचार्येणापि उक्तम्-

**लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव।**
**मधोः सितादेः दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः॥**

अतो प्रचलितश्चैत्रशुक्लप्रतिपदि एव नव-वत्सरस्याऽऽरम्भः भवति। इत्थमार्यभट्टेनाऽपि स्वीवकृतम्-

**युगवर्षमासादिवसाः समं प्रवृत्तास्तु चैत्रशुक्लादेः।**
**कालोऽयमनाद्यन्तो ग्रहभैरनुमीयते क्षेत्रे।**

इदं संवत्सरज्ञानं सकलश्रौत-स्मार्तधर्मवकृत्यार्थमावश्यकं भवति। उद्धरणान्यपि प्राप्यन्ते सोमयागविषये:-''संवत्सरे संवत्सरे सोमयाजी'' किञ्च अश्वमेघविषये च ''संवत्सरमाहुतिः जुहोति''।

पुनश्च कात्यायन श्रौतसूत्रे - ''पशिवज्या संवत्सरे संवत्सरे प्रावृषि''।

आवृत्तिरतः संवत्सरम् - ''इत्यादयः विविधाः प्रमाणाः संवत्सरज्ञानविषये दृश्यन्ते। वेदाङ्गज्योतिषे लगधमुनिना प्रोक्तं यत्-

**वेदाहि यज्ञार्थमभिप्रवृत्ताः,**
**कालानुपूर्वाविहिताश्च यज्ञाः।**

ऋग्-यजु-साम-अथर्ववेदरूपाः मन्त्रब्रह्मणात्मका वेदा हि विविधानां यज्ञानां प्रतिपादनाय प्रवृत्ताः सन्ति, यज्ञाश्च वेदेषु कालक्रमानुसारं विहिताः सन्ति। एतस्मादेव कालानुपूर्वयज्ञाविधानानुशासने अस्य नूतन संवत्सरस्य ज्ञानं दृश्यताम्। संवत्सरेऽस्मिन् वर्तमानकल्पारम्भतः ससन्धयः षण्मनवो व्यतीताः, वर्तमाने वैवस्तवमनुः वर्तते, तस्यापि प्रवृत्तस्य सप्तविंशतिमितानि महायुगानि व्यतीतानि, अतोऽष्टविंशतितमे युगे, त्रयो युगचरणाः गताः (सत्-त्रेता-द्वापरेति) चतुर्थे चरणे कलेरारम्भतो षोडशोत्तरैकपञ्चाशत वर्षाणि व्यतीतानि। अतो गुरुमानेन वर्षादौ ''सौम्य'' संवत्सर भविता। किञ्च वर्षेऽस्मिन् राजा शुक्रः, मन्त्रीबुधः, मेघेशोऽपि बुधः, सस्येशो शनिः, रसेशो चन्द्रः, नीरसेशः शनिः वर्तते। एतेषां सर्वेषां संवत्सरफलमापि विमृश्यते।

**संवत्सर- सौम्यः**
**जायन्ते सर्व धान्यानि स्वस्थं च निरुपद्रवम्।**
**सौम्य वृष्टि वरारोहे सौम्ये सौम्यं प्रजायते॥**

**राजा- शुक्रः**
**शुक्रस्य राज्ये बहुसस्य संकुला प्रभूततोयाम्बुधरा धरित्री।**
**फलन्ति वृक्षा बहुगोप्रसूति वसुन्धरा पार्थिव सौख्य संयुता॥**

**मन्त्री- बुधः**
**विविध धान्ययुता खलु मेदिनी प्रचुर तोयधना मुदिता जनाः।**
**नृपतयो जनपालनतत्परा सुरगुरौ ननु मन्त्रि समागते॥**

**मेघेश- बुधः**
**अमृतरश्मिसुते यदि वारिपे बहुजलं तुषधान्यरसादिकम्।**
**द्विजवरा यजनोत्सुक चेतसो विविधं सौख्य युता धरणी तदा॥**

**पूर्वधान्येश (सस्येश)- शनिः**
**रवि सुते यदि धान्य पतौ जनो नृपतिभिः परिपीडितविग्रहः।**
**गदभयं तुषधान्यहरं सदा दुरित वाद विवाद युता नराः॥**

**रसेश- चन्द्रः**
**यदि विधौ रसपे भुविमानवो नव नवां युवति बुभुजे प्रियाम्।**
**जलधरा बहुवारि विधायका रसवती धनधान्यवती मही॥**

**नीरसेश- शनिः**
**त्रपु पिण्डादि लोहानां कृष्ण वस्त्रादि वस्तुनाम्।**
**अर्घवृद्धिः प्रजायेत् मन्दे नीरस नायके॥**

## ''पाक्षिकपञ्चाङ्गम्''

- ज्योतिषाचार्यः सुरेन्द्रकुमार

**वि.संवत् २०७३, शाके १९३८, वैशाखकृष्णपक्षः (दिनांकः २३ अप्रैलतः ०६ मई २०१६ पर्यन्तम्) उत्तरायणम्, उत्तरगोलः, ग्रीष्मऋतुः, अयनांशः २४/०५'/०१''**

| दि. | वासरः | तिथिः | समाप्ति-कालः | | नक्षत्रम् | समाप्ति-कालः | | चन्द्र-संचारः | व्रत-पर्वोत्सवाः मुहूर्त्ताश्च |
|---|---|---|---|---|---|---|---|---|---|
| अप्र | | | घ. | मि. | | घ. | मि. | | |
| २३ | शनिः | प्रतिपदा | १३ | २० | स्वाती | १० | १८ | तुला | वैशाखकृष्णपक्षप्रा. स.सि.यो. १०:१८ पर्यन्तम् |
| २४ | रविः | द्वितीया | १५ | ३५ | विशाखा | १३ | ०६ | वृश्चिकः ०६:२५ | भद्रा २८/३६ वादनतः |
| २५ | सोमः | तृतीया | १७ | ३३ | अनु. | १५ | ४० | वृश्चिकः | शुक्रमेषराशौ १०:५०, |
| २६ | भौमः | चतुर्थी | १९ | ११ | ज्ये. | १७ | ५४ | धनु १७:५४ | श्रीगणेशचतुर्थीव्रतः स.सि.यो. |
| २७ | बुधः | पञ्चमी | २० | २३ | मूल. | १९ | ४३ | धनु | सूर्य-भरणीनक्षत्रे ११/४३ |
| २८ | गुरुः | षष्ठी | २१ | ०४ | पू.षा. | २१ | ०३ | मकरः २७:१७ | भद्राः ३८/५८ प्रारम्भः, सूर्य अश्विनी, मेषसंक्रान्ति |
| २९ | शुक्रः | सप्तमी | २१ | १० | उ.षा. | २१ | ४८ | मकरः | भद्राः ०८/४४ पर्यन्तम्, श्रीदुर्गाष्टमी, स.सि.यो. |
| ३० | शनिः | अष्टमी | २० | ३७ | श्रवण | २१ | ५५ | मकरः | वृद्धशीतलाष्टमी, स.सि.यो. २१:५५ पर्यन्तम |
| १ मई. | रविः | नवमी | १९ | २३ | धनि. | २१ | २२ | कुम्भः ०९:४३ | पंचकप्रारम्भः ०९/४८ वादने, श्रमिकदिवसः |
| ०२ | सोमः | दशमी | १७ | २९ | शत. | २० | ०९ | कुम्भः | बुध-अस्तः ९/४३ वादनतः, शुक्रास्तः १८/५४ |
| ०३ | भौमः | एकादशी | १४ | ५८ | पू.भा. | १८ | २० | मीनः १२:५० | वरूथिनि एकादशी, वल्लभाचार्यजयन्ती |
| ०४ | बुधः | द्वादशी | ११ | ५६ | उ.भा. | १६ | ०१ | मीनः | प्रदोषव्रतः, |
| ०५ | गुरुः | त्रयोदशी चतुर्दशी | ०८ २८ | २९ ४७ | रेवती | १३ | १८ | मेषः १३:१८ | भद्रा ०८/२९ वादनतः, मासशिवरात्रि |
| ०६ | शुक्रः | अमावस्या | २४ | ५९ | अश्विनी | १० | २३ | मेषः | वैशाख-अमावस्या, |




The book on "VADA IN THEORY AND PRACTICE: Studies in Debates, Dialogues and Discussions in Indian Intellectual Discourses" Written by Prof. RADHAVALLABH TRIPATHI, Former Vice Chancellor, Rashtriya Sanskrit Sansthan, New Delhi. Former Professor of Sanskrit, Dr. Harisingh Gour University, Sagar.(Joint publication of IIAS Shimla and DKPW, Delhi) is being released shortly.

## चर्तुथपुटस्य शेषभागः **वेदाः**

वेदेषु प्राचीनतमः ऋग्वेदः अस्ति । इत्यपि प्राप्यते यत् सर्वप्रथमः केवलं ऋग्वेदः एव आसीत्, पठन-पाठनसारल्यहेतुः एव द्वैपायनः अस्य विस्तारं चतुर्षु वेदेषु कृतवान्, अतः तस्य नाम व्यास इति अभवत्।

महाभाष्यस्य अनुसारम् ऋग्वेदस्य एकविंशतिः (21) शाखाः आसन्। एतासु शाखासु चरणव्यूहग्रन्थानुसारं पञ्च (5) शाखाः (शाकल, बाश्कल, आश्वलायन, शांखायन, माण्डूकायन) मुख्याः सन्ति। यासु साम्प्रतं केवलं शाकल शाखा एव प्राप्यते।

ऋग्वेदस्य (शाकल शाखा) विभाजनं द्विधा, अष्टकक्रमेण, मण्डलक्रमेण च कृतं अस्ति। अष्टकक्रमे, अष्ट अष्टकेषु अष्ट-2 अध्यायाः, प्रत्येकस्मिन् अध्याये केचन वर्गाः, प्रत्येकवर्गे काश्चन ऋचाः सन्ति। अनेन क्रमेण सम्पूर्ण 2006 वर्गाः 10417 ऋचाः च सन्ति। शौनकाचार्यस्य अनुक्रमण्याम् अस्य पूर्णसंख्या 10580-1/4 इति अस्ति। ऋचां दशसहस्राणि ऋचां पंचशतानि च, ऋचामशीतिः पादश्च पारणं सम्प्रकीर्तितम्। मण्डलक्रमः अतिप्रचलितः अस्ति। एतस्यानुसारं ऋग्वेदः दशमण्डलेषु विभक्तः अस्ति। प्रत्येकेषु मण्डलेषु विभिन्न अनुवाकाः, तेषु कानिचन सूक्तानि, प्रत्येकेषु सूक्तेषु केचन मन्त्राः सन्ति। औसतसंख्या पञ्च अस्ति। एवं विधा सम्पूर्णं 1028 सूक्तानि सन्ति येषु 11 खिल सूक्तानि सन्ति। प्रथम मण्डलस्य द्रष्टारः शतार्चिननामधारिणः सन्ति। 2 तः 8 पर्यन्तं वंशमण्डल इति संज्ञया अभिहिताः। नवममण्डलं सोम, पवमानमण्डलं वा कथ्यते। अस्य मण्डलस्य सर्वाणि सूक्तानि सोमदेवाय समर्पितमस्ति। दशममण्डलस्य नासदीय सूक्तपर्यन्तं सूक्तानि महासूक्तानि, अनन्तरं क्षुद्रसूक्तानि इति अथ च एतेषां द्रष्टारः अपि एतया संज्ञया एव अभिहिताः। ऋग्वेदस्य प्रधानदेवः इन्द्रः अस्ति। अस्य 250 सम्पूर्णसूक्तेषु अपि च अन्येषु आंशिकरूपेण अर्चना कृता अस्ति। ऋग्वेदे समस्तमण्डलानां प्रारम्भिकसूक्तानि अग्नये समर्पितानि सन्ति।

अग्निः ऋग्वेदस्य द्वितीयः प्रधानदेवः अस्ति। अस्य 200 सम्पूर्णसूक्तेषु अन्यत्र च आंशिकरूपेण अर्चना कृतास्ति। ऋग्वेदस्य रक्षार्थम् अपरिवर्तनीयं भूयात् अतः अपि सूक्तानां शब्दानाम् अपि गणना कृतास्ति। शौनकानुक्रमणी मध्ये एषा संख्या 153826 अस्ति। शाकल्यदृष्टेः पदलक्षमेकं सार्धं च वेदे त्रिसहस्रयुक्तम्, शतानि चाष्टौ दशकद्वयं च पदानि षट् चेति हि चर्चितानि। (अनुक्रमणी 45) शब्दानामेव न अपितु वर्णानामपि गणना कृता अस्ति। अनुक्रमणी अनुसारं एषा संख्या 43200 अस्ति। वृहतीसहस्राण्येतावत्यो हर्चो याः प्रजापतिः सृष्टाः (शत0 ब्रा0-10,4,2,23), चत्वारिंशतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि - (शौनक-वाकानुक्रमणी) ऋग्वेदस्य प्रथम अध्यापनं वेदव्यासः स्वशिष्यं पैलं प्रति कृतवान्। तत्रर्गवेदधरः पैलः। ऋग्वेदस्य दशममण्डलस्य ऋषयः एव तस्य देवताः अपि सन्ति। मन्त्राणां दर्शने महिलानामपि सहयोगः अस्ति। तासु अगस्त्यपत्नी लोपामुद्रा, महर्षि अम्भृणपुत्री वाक् इत्ययोः नाम विशेषतया उल्लेखनीयमस्ति।

# सारस्वत-सम्मान-समारोहः सम्पन्नः

इलाहाबाद। नवसंवत्सरारम्भे वासन्तिकनवरात्रे 2016 ईसवीयवर्षे अप्रैलमासस्य 11 दिनाँके सोमवासरे इलाहाबाद-विश्वविद्यालयस्य संस्कृत-विभागे प्राच्यमहाकक्षे सरस्वत्याः वरदपुत्रयोर्द्वयोः सारस्वत-सम्मान-समारोहः भव्यतया सम्पन्नः। आदौ वाग्देव्याः सरस्वत्याः प्रतिमायै माल्यार्पणं, विभागीयछात्राया सरस्वती-वन्दनं च प्रस्तुतम्। इलाहाबाद-विश्वविद्यालयीय-संस्कृत-विभागस्य पूर्वाचार्याः प्रख्यातविद्वांसो महाकवयः वाराणसेय-सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य कुलपतिचराः अभिराजराजेन्द्रमिश्रवर्याः उत्तर-प्रदेश-संस्कृत-संस्थानस्य अतिप्रतिष्ठितेन विश्वभारती-पुरस्कारेण सम्मानिता, पुनश्च अस्य विभागस्य अध्यक्षचराः, सुकवयः, समालोचकाः, प्रो० हरिदत्तशर्माणः सद्यः एकादशमार्चदिवसे संस्कृताय अतिविशिष्टयोगदानार्थं महामहिमराष्ट्रपतिना राष्ट्रपति-सम्मानेन सम्मानिताः। अतोऽस्मिन् अवसरे उभावेव विद्वांसौ विभागेन सभाजितौ। इलाहाबाद-विश्वविद्यालयस्य यशस्विना कुलपतिना प्रो० रतनलाल-हांगलू-महोदयेन उभाभ्यां मनीषिभ्यां माल्यं, पुष्पगुच्छम्, अलङ्करणं, स्मृतिचिह्नम्, अङ्गवस्त्रं, नारिकेलफलं च प्रदाय सम्यग्रूपेण विद्वदर्चनं कृतम्, स्ववाग्विलासेन स्वकीयभावनाश्च प्रदर्शिताः। संस्कृत-विभागस्य अध्यक्षेण प्रो० शङ्करदयालद्विवेदिमहाभागेन सर्वेषां समागतानाम् अतिथीनाम् वाचिकं स्वागतं व्याहृतम्, पुनश्च विस्तरेण प्रो० राजेन्द्रमिश्राणां व्यक्तित्वस्य कर्तृत्वस्य, विशालसाहित्यस्य, प्रो० हरिदत्तशर्मणां व्यक्तित्वस्य, कर्तृत्वस्य वैदेशिक- यात्राणां च परिचयः प्रदत्तः। मनीषिणोरुभयोः प्रशस्तिपरकमभिनन्दन-पत्र-समर्पणं जातम्। सिद्धकविना प्रो० जनार्दनप्रसाद-पाण्डेय-मणिना विरचितयोरनयोरभिनन्दन-पत्रयोर्वाचनं मिश्रवर्याणां कृते स्वयं मणिना, शर्मवर्याणां कृते डॉ० राजेन्द्रत्रिपाठिरसराजेन विहितम्। मिश्रमहोदयेन शर्ममहाशयेन च स्वकृतज्ञताभावा माधुर्यपूरितया वाचा प्रकटिताः। कार्यक्रमस्य संचालनं प्रो० रामसेवकदुबेवर्येण, धन्यवादज्ञापनं च प्रो० मृदुलात्रिपाठिमहोदयया कृतम्। अस्मिन्नवसरे विश्वविद्यालयस्य विभिन्नेभ्यः विभागेभ्यः अनेकेभ्यः महाविद्यालयेभ्यः संस्थानेभ्यश्च समागताः प्राध्यापकाः, विद्वांसः अभ्यागताः विभागीयाः प्राध्यापकाः शोधच्छात्राश्च समुपस्थिता आसन्।




# वेदोपनिषत्सु अस्पृश्यतायाः उल्लेखः नास्तिः -डॉ.कृष्णगोपालः

नवदेहली । राष्ट्रीयस्वयंसेवकसंघद्वारा डॉ. भीमराव-अम्बेडकरमहोदयानां 125तमे जयन्त्याः अवसरे कार्यक्रमस्यायोजनं कृतम् । विभिन्नानां घोषरचनानां वादनं कुर्वन् त्रिषु स्थानेषु पथ संचालनं कृतम् । अनन्तरं च पहाडगंजस्थाने करनैलसिंहक्रीडापरिसरे भव्यजनसभायाः आयोजनं कृतम् ।



सभां संबोधयन् संघस्य सहकार्यवाहकेन डॉ. कृष्णगोपालमहोयेन कथितं यत् अम्बेडकरमहोदयानां जन्मसमये देशः 700-800वर्षाणां परतन्त्रतायाः प्रतिकारं कुर्वन् आसीत् । अपरं च देशस्य समाजे सुदीर्घपरतन्त्रतायाः कारणात् विविधाः कुरीतयः आसन् । तासां कुरीतीनां निवारणस्यापि आवश्यकता आसीत् । स्वकीयोद्वोधने तैः स्पष्टं कथितं यत् वेदेषु उपनिषत्सु च अस्पृश्यतायाः उल्लेखः कुत्रापि नासीत् । भगवतः बुद्धस्य कालं यावदपि अस्पृश्यता नैव आसीत् तथा च सामाजिकभेदभावस्य प्रतिकाराय भगवता बुद्धेनापि संघर्ष कृतम् । यदा देशः परतन्त्रः आसीत् तदा विविधाः सामाजिकाः व्यवस्थाः अस्त-व्यस्ताः जाताः । जनाः स्वकीय सुरक्षार्थं विविध सम्प्रदायेषु संकुचिताः जाताः येन च जातयः उपजातयश्च निर्मिताः ।

अस्याः व्यवस्थायाः प्रतिकाराय अपि समाजे संघर्षः जातः । कबीर-रैदास-गुरुनानक- महात्माफुले-अम्बेडकरमहोदयश्च विशिष्टसमाजसुधारकः आसन् । तैः बुद्धस्य मार्गमनुसृत्य राष्ट्रस्य एकतायाः मार्गे संगच्छन् समाजस्य शोषितवर्गाणामधिकाराय प्रयासाः कृताः । अम्बेडकरमहोदयानां संस्कृतभाषायां विशिष्टाभिरुचिरासीत् ।

# 'भारतीय-संस्कृत-पत्रकार-संघस्य अभिनव-कार्यकारिण्याः प्रथमोपवेशनं'

नवदेहली। चैत्र-नवरात्रारम्भे विशद-विचारणा-पुरस्सरं संघस्य अध्यक्षस्य पद्म-श्रियः डॉ.रमाकान्त-शुक्लस्य आध्यक्ष्ये संघस्य उपाध्यक्ष-त्रयस्य महासचिवस्य सचिवस्य संयुक्त-सचिवयोः 'संस्कृत-भवितव्यम्'-इति साप्ताहिक-पत्रिकायाः प्रतिनिधि-भूतायाः डॉ.विजया-जोषि-महाभागायाः कार्यकारिणी-सदस्यस्य श्रीवेदप्रकाश-शर्मणः च समुपस्थितौ नैक-प्रस्तावोपस्थापनेन प्रस्तावानुमोदनेन च साकमेव सम्पन्नम्। आरम्भे अध्यक्ष-महोदयेन नूतन-कार्यकारिण्याः सर्वेऽपि समुपस्थिताः अनुपस्थिताश्च सदस्याः अभिनन्दिताः, अनागते चानेहसि अनेकविध-कार्याणि क्रिययान्वेतुं प्रेरिताः। महासचिवेन डॉ.बलदेवानन्द-सागरेण विगते वर्षे डिसम्बर-मासे 10-11-दिनाङ्कयोः दिल्ल्याम् अक्षरधाम्नि सम्पन्नायाः पञ्चम्याः राष्ट्रिय-संस्कृत-पत्रकार-संगोष्ठ्याः संक्षिप्तं विवरणम् उपस्थापितम् वर्षेऽह्यस्मिन् जून-मासे प्रथमे दिने संस्कृत-पत्रकारितायाः सार्ध-शती पूर्णतां यास्यति इति कृत्वा कृत्स्नेऽपि राष्ट्रे आवर्षं नाना-स्थानेषु संस्कृत-पत्रकारिता-विषयिण्यः कार्यशालाः आयोजनीयाः इति महासचिवेन उपस्थापितः प्रस्तावः कार्यकारिण्या स्वीकृतः । कोषाध्यक्षेण प्रो.सी.बी.झा-वर्येण 2015-2016-वित्त-वर्षस्य आय-व्यय-विवरणं प्रस्तुतम्। संघस्य त्रैमासिक-पत्रिकायाः प्रकाशनार्थं 'वेब्साइट्' इति वैद्युत-वाहिन्याः संरचनार्थमपि कार्यकारिण्या स्वीकृतम्। संघस्य उपाध्यक्षस्य डॉ.सम्पदानन्द-मिश्रस्य 'वन्दे-मातरम्-ग्रन्थागार'-संरचना-प्रस्तावस्य कृते संघ-पक्षतः साहाय्यानुष्ठानं कार्यकारिण्या अनुमोदितम्, अपि च, अभिलषितं यद् अस्मिन् अपि ग्रन्थागारे संस्कृत-पत्रकारितायाः कृते विशिष्टानुसन्धानादिकं च स्यादिति। वडोदरातः प्राप्तः उपाध्यक्षः डॉ.प्रफुल्ल-पुरोहितः देहरादूनतः आयातः उपाध्यक्षः डॉ.बुद्धदेव-शर्मा च सर्वैरपि सदस्यैः अभिनन्दितौ, विद्यापीठस्य कुलपतिः भा.सं.प.सङ्घस्य उपाध्यक्षः च प्राचार्यः प्रो.रमेशकुमार-पाण्डेयः आतिथेयत्वेन समेषामपि समुचितमातिथ्यम् अन्वतिष्ठत्।



अस्माकं प्रेरणास्त्रोतः:- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः:-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः:- संदीप कुमार उपाध्याय, सन्नीकुमार, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।